Adarsh®

LONG BOOK

Name ______________________

____

A PRODUCT OF
Adarsh
COPY HOUSE
DELHI-110006

અધ્યયનાર્થ
અનિવાર્યમ્

ભૂ + સ્થ્ – ૫૦૭-૧-૧૨
અપાદિ – ૬૭
ઉદ્દાયાદિ ૮૧
પાદિ ૮૮
રપાદિ ૬૨

अथ भ्वादिप्रकरणम्

१. भू धातु

१. भवति

	भू धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	भू ल्
तिप्तस्झि सिप्....	लकार स्थाने तिबादेशे। अनु० लोपे	भू ति
तिङ्शित्सार्वधातुकम्	सार्वधातुकं संज्ञायाम्	
कर्तरि शप्	शबागमे। अनु० लोपे	भू अ ति
सार्वधातुकार्धधातुकयोः	गुणे	भो अ ति
एचोऽयवायावः	अव् आदेशे	भव् अ ति =
		भवतीति सिद्धः

२. भवन्ति

	भू धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	भू ल्
तिप्तस्झि सिप्....	झि आदेशे	भू झि
झोऽन्तः	झ स्थाने अन्त आदेशे	भू अन्त इ
कर्तरि शप्	शबागमे। अनु० लोपे	भू अ अन्ति
अतो गुणे	पररूपे	भू अन्ति
सार्वधातुकार्धधातुकयोः	गुणे	भो अन्ति
एचोऽयवायावः	अवादेशे	भवन्तीति सिद्धः

३. भवामि

	भू धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	भू ल्
शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झि सिप्....	मिबादेशे। अनु० लोपे	भू मि
तिङ्शित्सार्वधातुकम्	सार्वधातुकं संज्ञायाम्	
कर्तरि शप्	शबागमे। अनु० लोपे	भू अ मि
सार्वधातुकार्धधातुकयोः	गुणे	भो अ मि

एचोऽयवायावः	अवादेशे	भवमि
अतो दीर्घो यञि	दीर्घे	भवामीति सिद्धम्।

4. भवावः

	भूधातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	भू ल
शेषात्कर्तरि परस्मैपदम्	परस्मैपद संज्ञायाम्	
तिप्तस्झिसिप्...	वसादेशे	भू वस
तिङ्शित्सार्वधातुकम्	सार्वधातुक संज्ञायाम्	
कर्तरि शप्	शबागमे। अनु० लोपे	भू अवस
सार्वधातुकार्धधातुकयोः	गुणे	ओ अवस
एचोऽयवायावः	अवादेशे	भववस
अतो दीर्घो यञि	दीर्घादेशे	भवावस
ससजुषो रुः	सकारस्य रुत्वे	भवावर्
खरवसानयोर्विसर्जनीयः	सकारस्य विसर्गे	भवावः इति सिद्धम्।

5. बभूव

	भूधातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	भू ल्
तिप्तस्झि.......	तिबादेशे	भू तिप्
लिट् च	आर्धधातुक संज्ञायाम्	
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे। अनु० लोपे	भू अ
भुवो वुग्लुङ्लिटोः	वुगागमे। अनु० लोपे	भूव् अ
लिटि धातोरनभ्यासस्य	द्वित्वे कार्ये	भूव् भूव् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	भू भूव् अ
भवतेरः	ऊकारस्य अकारादेशे	भभूव् अ
अभ्यासे चर्च	जशादेशे	बभूवेति सिद्धम्

6. बभूविथ

	भूधातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	भू ल्

शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झि सिप्	सिबादेशे	भू सिप्
परस्मैपदानां णलतुसुस्थल ...	सिप् स्थाने थलादेशे, अनु० लोपे	भू थ
लिट् च	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	भू इ थ
भुवो वुग्लुङ्लिटोः	वुगागमे, अनु० लोपे	भूव् इ थ
लिटि धातोरनभ्यासस्य	द्वित्वे कार्ये	भूव् भूव् इ थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	भू भूव् इ थ
भवतेरः	ऊकारस्य अकारे	भभूविथ
अभ्यासे चर्च	जश्त्वे	बभूविथेति सिद्धं

7. बभूवथुः

	भू धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	भू ल्
तिप्तस्झि ...	थसादेशे	भू थस्
परस्मैपदानां णलतुसुस्थ	थस स्थाने अथुस आदेशे	भू अथुस्
लिट् च	आर्धधातुक संज्ञायाम्	
भुवो वुग्लुङ्लिटोः	वुगागमे, अनु० लोपे	भूव् अथुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	भूव् भूव् अथुस्
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	भू भूव् अथुस्
भवतेरः	ऊकारस्य अकारे	भभूवथुस्
अभ्यासे चर्च	जश्त्वे	बभूवथुस्
	सस्य रुत्व विसर्गे	बभूवथुः इति सिद्धं

8. भविता

	भू धातोः	
अनद्यतने लुट्	लुट् लकारे, अनु० लोपे	भू ल्
तिप्तस्झि ...	तिबादेशे	भू तिप्

स्यतासीलृलुटोः	तास् आगमे	भूतास् तिप्
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप्स्थाने डा आदेशे, अनुलोपे	भू तास् आ
आर्धधातुकस्येड्वलादेः	इडागमे, अनुलोपे	भू इतास् आ
सार्वधातुकार्धधातुकयोः	गुणे	भो इतास् आ
एचोऽयवायावः	अवादेशे	भव् इतास् आ
टेः	डित्त्वसामर्थ्यादभस्यापि टेर्लोपः	भवित् आ
पुगन्तलघूपधस्य च	गुणप्राप्ते	
दीधीवेवीटाम्	इति अनेन सूत्रेण गुणनिषेधः	भविता इति सिद्धः

9. भवितारौ

भूधातोः

अनद्यतने लुट्	लुट् लकारे अनुलोपे	भू ल्
तिप्तस्झिसिप्...	लकारस्थाने तस् आदेशे	भू तस्
लुटः प्रथमस्य डारौरसः	तस् स्थाने रौ आदेशे	भू रौ
स्यतासी लृलुटोः	तासागमे	भू तास् रौ
आर्धधातुकम् शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनुलोपे	भू इतास् रौ
रि च	सकार लोपे	भू इता रौ
सार्वधातुकार्धधातुकयोः	गुणे	भो इतारौ
एचोऽयवायावः	अवादेशे	भवितारौ इति सिद्धः

10. भवितासि

भूधातोः

अनद्यतने लुट्	लुट् लकारे, अनुलोपे	भू ल्
तिप्तस्झिसिप्...	सिबादेशे, अनुलोपे	भू सि
~~आर्ध~~ स्यतासीलृलुटोः	तासागमे	भू तास् सि
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनुलोपे	भू इतास् सि
सार्वधातुकार्धधातुकयोः	गुणे	भो इतास् सि

इचोऽयवायावः	अवादेशे	भवितास् सि
तासस्त्योर्लोपः	सकार लोपे	भवितासि इति सिद्धम्।

११. भविष्यति

	भूधातोः	
लृट् शेषे च	लृट्लकारे। अनु० लोपे	भू ल
तिप्तस्झि...	तिबादेशे। अनु० लोपे	भू ति
स्यतासी लृलुटोः	स्यागमे। अनु	भू स्यति
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड् वलादेः	इडागमे। अनु० लोपे	भू इ स्यति
सार्वधातुकार्धधातुकयोः	गुणे	भो इस्यति
इचोऽयवायावः	अवादेशे	भविस्यति
आदेशप्रत्यययोः	षत्वे	भविष्यतीति सिद्धम्।

१२. भवतु/भवतात्

	भूधातोः	
लोट् च	लोट्लकारे। अनु० लोपे	भू ल
तिप्तस्झिसिप्...	तिबादेशे। अनु० लोपे	भू ति
कर्तरि शप्	शबागमे। अनु० लोपे	भू अति
सार्वधातुकार्धधातुकयोः	गुणे	भो अति
इचोऽयवायावः	अवादेशे	भवति
एरुः	इकारस्य उकारादेशे	भवतु
तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्	विकल्पेन तातङ् आदेशे। अनु० लोपे	भवतात् (1)
	अभाव पक्षे	भवतु इति रूपद्वयं सिद्धम्

१३. भवताम्

	भूधातोः	
लोट् च	लोट्लकारे। अनु० लोपे	भू ल
तिप्तस्झि....	तसादेशे	भू तस्
कर्तरि शप्	शबागमे। अनु० लोपे	भू अ तस्
सार्वधातुकार्धधातुकयोः	गुणे	भो अतस्

एचोऽयवायावः	अवादेशे	भवितास् सि
तासस्त्योर्लोपः	सकार लोपे	भवितासि इति सिद्धम्।

११. भविष्यति

	भूधातोः	
लृट् शेषे च	लृट्लकारे। अनु० लोपे	भूलृ
तिप्तस्झि ...	तिबादेशे। अनु० लोपे	भूति
स्यतासीलृलुटोः	स्यागमे।	भूस्यति
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड् वलादेः	इडागमे। अनु० लोपे	भू इ स्यति
सार्वधातुकार्धधातुकयोः	गुणे	भो इस्यति
एचोऽयवायावः	अवादेशे	भविस्यति
आदेश प्रत्यययोः	षत्वे	भविष्यतीति सिद्धम्।

१२. भवतु/भवतात्

	भूधातोः	
लोट् च	लोट्लकारे। अनु० लोपे	भूलृ
तिप्तस्झिसिप् ...	तिबादेशे। अनु० लोपे	भूति
कर्तरि शप्	शबागमे। अनु० लोपे	भू अति
सार्वधातुकार्धधातुकयोः	गुणे	भो अति
एचोऽयवायावः	अवादेशे	भवति
एरुः	इकारस्य उकारादेशे	भवतु
तुह्योस्तातङाशिष्यन्यतरस्याम्	विकल्पेन तातङ् आदेशे। अनु० लोपे	भवतात् (1)
	अभाव पक्षे	भवतु इति रूपद्वयं सिद्धम्

१३. भवताम्

	भूधातोः	
लोट् च	लोट्लकारे। अनु० लोपे	भूलृ
तिप्तस्झि ...	तसादेशे	भूतस्
कर्तरि शप्	शबागमे। अनु० लोपे	भूअतस्
सार्वधातुकार्धधातुकयोः	गुणे	भोअतस्

	अवादेश	भवतस्
एचोऽयवायावः	लोटो लङ् इव कार्ये	
लोटो लङ्वत्	तस् स्थाने ताम् आदेशे	भवताम् इतिसिद्धं।
तस्थस्थमिपां तांतंतामः		

14. भव / भवतात्

	भू धातोः	
लोट् च	लोट् लकारे। अनु० लोप	भू ल्
तिप्तस्झिसिप्....	लकारस्थाने सिबादेश। अनुबन्धलोप	भू सि
सेर्ह्यपिच्च	सिस्थाने हि आदेश।	भू हि
कर्तरि शप्	शबागमे। अनु० लोप	भू अ हि
सार्वधातुकार्धधातुकयोः	गुण	भो अ हि
एचोऽयवायावः	अवादेश	भवहि
~~अतो हेः~~	~~हि लोप~~	~~भव~~
तुह्योस्तातङाशिष्यन्यतरस्याम्	हिस्थाने तातङ् आदेश विकल्पेन	भवतातङ्
	अनु० लोप	भवतात् इतिरूप (1)
	अभाव पक्षे	भवहि
अतो हेः	हि लोप	भव इतिसिद्धं (2)

15. भवानि

	भू धातोः	
लोट् च	लोट् लकारे। अनुबन्धलोप	भू ल्
तिप्तस्झि....	मिबादेश। अनु० लोप	भू मि
कर्तरि शप्	शबागमे। अनु० लोप	भू अ मि
सार्वधातुकार्धधातुकयोः	गुण	भो अ मि
एचोऽयवायावः	अवादेश	भव मि
मेर्निः	मिस्थाने नि आदेश	भव नि
~~अतो दीर्घो यञि~~ आडुत्तमस्य पिच्च	आडागमे। अनुबन्धलोप	भवानि इतिसिद्धं।

16. भवाव

	भू धातोः	
लोट् च	लोट् लकारे। अनु० लोप	भू ल्

तिप्तस्झि...	वस आदेश	भूवस
कर्तरि शप्	शबागमे, अनु० लोपे	भू अवस
सार्वधातुकार्धधातुकयोः	गुण	भोअवस
एचोऽयवायावः	अवादेश	भववस
~~अतो दीर्घो यञि~~ आडुत्तमस्य पिच्च	~~दीर्घ~~ आडागमे दीर्घे आकारादेशे	भव मातस भवावस
लोटो लङ्वत्	लङ् इव कार्य	
नित्यं ङितः	सकार लोप	भवाव इति सिद्धं।

१७. अभवन्

	भू धातोः	
अनद्यतने लङ्	लङ् लकारे, अनु० लोपे	भू ल
तिप्तस्झि...	~~तिबादेश~~ झि आदेश	भू झि
झोऽन्तः	झ स्थाने अन्त आदेश	भू अन्ति
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागम, अनु० लोपे	अभू अन्ति
इतश्च	इकार लोपे	अभू अन्त्
कर्तरि शप्	शबागमे, अनु० लोपे	अभू अ अन्त्
अतो गुणे	पररूप	अभूअन्त्
सार्वधातुकार्धधातुकयोः	गुणे	अभोअन्त्
एचोऽयवायावः	अवादेश	अभवन्त्
~~संयोगान्तस्य लोपः~~ हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्	तकार लोप	अभवन् इति सिद्धं।

१८. भवेत्

	भू धातोः	
विधिनिमन्त्रणामन्त्रणाधीष्ट...	लिङ् लकारे, अनु० लोपे	भू ल
तिप्तस्झि...	तिबादेश, अनु० लोपे	भू ति
इतश्च	इकार लोपे	भू त्
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनु० लोपे	भू यास् त्
सुट् तिथोः	सुडागमे, अनु० लोपे	भू यास् स् त्
तिङ् शित् सार्वधातुकम्	सार्वधातुके संज्ञायाम्	
लिङः सलोपोऽनन्त्यस्य	अनयोः सकारयोः लोपे	भू यात्

कर्तरि शप्	शबागमे, अनु० लोपे	भू अयात्
सार्वधातुकार्धधातुकयोः	गुणे	भो अयात्
एचोऽयवायावः	अवादेशे	भवयात्
अतोयेयः	इय् आदेशे	भव इय् त्
आद्गुणः	गुणे ~~एकादेशे~~	भवेय् त्
लोपो व्योर्वलि	यकार लोपे	भवेत् इति सिद्धः।

19. भवेयुः

	भू धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्न..	लिङ् लकारे, अनु० लोपे	भू ल्
तिप्तस्झिसिप्....	~~तिबादेशे~~ झि आदेशे, अनु० लोपे	भू झि
कर्तरि शप्	शबागमे, अनु० लोपे	भू अ झि
सार्वधातुकार्धधातुकयोः	गुणे	भो अ झि
एचोऽयवायावः	अवादेशे	भव झि
यासुट्परस्मैपदेषूदात्तो ङिच्च	यासुट् परस्मैपदेषु वात आगमे, अनु० लोपे	भव यास् झि
झेर्जुस्	जुस् आदेशे, अनु० लोपे	भवयास् उस्
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	भवया उस्
अतोयेयः	इयादेशे	भव इय् उस्
आद्गुणः	गुणे ~~एकादेशे~~	भवेयुस्
	ससजुषोरुः विसर्गे	भवेयुः इति सिद्धः।

20. भवेः

	भू धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्न..	लिङ् लकारे, अनु० लोपे	भू ल्
तिप्तस्झिसिप्....	सिबादेशे, अनु० लोपे	भू सि
इतश्च	इकार लोपे	भू स्
कर्तरि शप्	शबागमे, अनु० लोपे	भू अ स्
सार्वधातुकार्धधातुकयोः	गुणे	भो अ स्
एचोऽयवायावः	अवादेशे	भव स्
यासुट्परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनु० लोपे	भव यास् स्

अतोयेयः	यासस्थाने इय आदेशे	भव इयस्
लोपोव्योर्वलि	यकार लोपे	भव इस्
आद्गुणः	गुणे ~~आदेशे~~	भवेस्
	सस्य रुत्व विसर्गौ	भवेः इति सिद्धं।

२१. भवेयम्

	भू धातोः	
विधिनिमन्त्रणामन्त्रणाधीष्ट...	लिङ् लकारे। अनु॰लोपे	भू ल्
तिप्तस्झि...	मिबादेशे।	भू मिप्
तस्थस्थमिपां तांतंतामः	मिप् स्थाने अम् आदेशे	भू अम्
कर्तरि शप्	शबागमे। अनु॰लोपे	भू अ अम्
सार्वधातुकार्धधातुकयोः	गुणे	भो अ अम्
एचोऽयवायावः	अवादेशे	भव अम्
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे। अनु॰लोपे	भव यास् अम्
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	भव या अम्
अतोयेयः	इय आदेशे	भव इय अम्
आद्गुणः	गुणे आदेशे	भवेयम् इति सिद्धं।

२२. भूयात्

	भू धातोः	
आशिषि लिङ्लोटौ	लिङ् लकारे। अनुबन्धलोपे	भू ल्
तिप्तस्झि...	तिबादेशे। अनु॰लोपे	भू ति
इतश्च	इकारलोपे	भू त्
लिङाशिषि	आर्धधातुकं संज्ञायाम्	
~~लिङाशिषि~~ यासुट्परस्मैपदेषु	यासुडागमे। अनु॰लोपे	भू यास् त्
सुट् तिथोः	सुडागमे। अनु॰लोपे	भू यास् स् त्
स्कोः संयोगाद्योरन्ते च	उभयोः सकारलोपे	भू यात्
सार्वधा॰ किदाशिषि	कित् संज्ञायाम्	
सार्वधातुकार्धधातुकयोः	गुणे प्राप्ते	
क्ङिति च	गुण निषेधे	भूयात् इति सिद्धं।

23. अभूत

	भू धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	भू ल
तिप्तस्झिसिप्...	तिबादेशे, अनु० लोपे	भू ति
इतश्च	इकार लोपे	भू त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अभूत
च्लि लुङि	च्लि आगमे	अभू च्लि त
च्लेः सिच्	च्लेः स्थाने सिजादेशे। अनु० लोपे	अभू स् त
गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु	सिच् लोपे	अभूत
सार्वधातुकार्धधातुकयोः	गुण प्राप्ते	
भूसुवोस्तिङि	इति अनेन सूत्रेण निषेधे	अभूत इति सिद्धम्

24. अभूवन्

	भू धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	भू ल
तिप्तस्झिसिप्थस्थ...	झि आदेशे।	भू झि
झोऽन्तः	झ स्थाने अन्त आदेशे	भू अन्ति
इतश्च	इकार लोपे	भू अन्त्
संयोगान्तस्य लोपः	तकारलोपे	भू अन्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	लुङ्लकारे। अनु० लोपे अडागमे	अभू अन्
कर्तरि शप्	शप् प्राप्ते	
च्लि लुङि	तत् प्रबाध्य च्लि आगमे	अभू च्लि अन्
च्लेः सिच्	च्लेः स्थाने सिजादेशे। अनु० लोपे	अभू स् अन्
गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु	सिच् लोपे	अभू अन्
सार्वधातुकार्धधातुकयोः	गुण प्राप्ते	
भूसुवोस्तिङि	इति अनेन सूत्रेण गुणनिषेधे	अभू अन्
इको यणचि	इकः स्थाने यण् आदेशे	
भुवो वुग्लुङ्लिटोः	वुगागमे। अनु० लोपे	अभूवन्
		अभूवन् इति सिद्धम्

५५. अभविष्यन्

	भू धातोः	
लिङ्निमित्ते लृङ् क्रियातिपत्तौ	लृङ् लकारे। अनु० लोपे	भू ल
तिप्तस्झिसिप्थस्थ...	झि आदेशे।	भू झि
झोऽन्तः	झकारस्य अन्त आदेशे	भू अन्ति
इतश्च	इकार लोपे	भू अन्त्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अभू अन्त्
कर्तरि शप्	शप् प्राप्ते	
स्यतासी लृलुटोः	तत् प्रबाध्य स्य आगमे	अभू स्य अन्त्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	अभू इ स्य अन्त्
सार्वधातुकार्धधातुकयोः	गुणे	अभो इ स्य अन्त्
एचोऽयवायावः	अव आदेशे	अभ वि स्य अन्त्
आदेशप्रत्यययोः	षत्वे	अभविष्य अन्त्
अतो गुणे	पररूपे	अभविष्यन्त्
संयोगान्तस्य लोपः	तकार लोपे	अभविष्यन् इति सिद्धम्।

२. एध धातोः

५६. एधते

	एध धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	एध ल
तङानावात्मनेपदम्	आत्मनेपद संज्ञायाम्	
तिप्तस्झि...	लकारस्थाने त आदेशे	एध त
कर्तरि शप्	शबागमे। अनु० लोपे	एध अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	एधते इति सिद्धम्।

५७. एधेते

	एध धातोः	
वर्तमाने लट्	लट् लकारे अनु० लोपे	एध ल्

तिप्तस्झिसिप्थस्थ...	लकारस्थाने आताम् आदेशे	एध् आताम्
कर्तरि शप्	शबागमे, अनु० लोपे	एध् अ आताम्
सार्वधातुकमपित्	ङिद्वद्भावे	एध आताम्
आतो ङितः	आकारस्य इय् आदेशे	एध इय् ताम्
आद्गुणः	गुण एकादेशे	एधेय् ताम्
लोपो व्योर्वलि	यकार लोपे	एधेताम्
टित आत्मनेपदानां टेरे	टेरेत्वे	एधेते इति सिद्धम्

28. एधसे

	एध धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	एध् ल
तिप्तस्झि...	लकारस्थाने थास् आदेशे	एध् थास्
तिङ् शित्सार्वधातुकम्	सार्वधातुकं संज्ञायाम्	
कर्तरि शप्	शबागमे, अनु० लोपे	एध् अ थास्
थासः से	थासः से आदेशे	एधसे इति सिद्धम्

29. एधे

	एध धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	एध् ल
तिप्तस्झिसिप्...	इडादेशे, अनु० लोपे	एध् इ
कर्तरि शप्	शबागमे, अनु० लोपे	एध् अ इ
टित आत्मनेपदानां टेरे	टेरेत्वे	एध ए
अतो गुणे	पररूपे	एधे इति सिद्धम्।

30. एधामहे

	एध धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	एध् ल
तिप् तस्झिसिप्थस्थ...	महिङ् आदेशे, अनु० लोपे	एध् महि
कर्तरि शप्	शबागमे, अनु लोपे	एध् अ महि
अतो दीर्घो यञि	दीर्घे	एधामहि
टित आत्मनेपदानां टेरे	टेरेत्वे	एधामहे इति सिद्धम्।

31. स्पर्धाञ्चक्रे

स्पर्ध धातोः

परोक्षे लिट्	लिट् लकारे। अनु० लोपे	स्पर्ध ल
इजादेश्च गुरुमतोऽनृच्छः	आमागमे	स्पर्ध आम् ल
आमः	लिट् लुकि	स्पर्ध आम्
कृञ्चानुप्रयुज्यते लिटि	कृ धातु अनुप्रयोगे	स्पर्ध आम् कृ
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य	आत्मनेपद संज्ञायाम्	
पुनः 'परोक्षे लिट्'	लिट् लकारे। अनुलोपे	स्पर्धाम् कृ ल
तिप्तस्झिसिप्	त आदेशे	स्पर्धाम् कृ त
लिटस्तझयोरेशिरेच्	तकारस्य एश् आदेशे	स्पर्धाम् कृ एश्
	अनुबन्धलोपे	स्पर्धाम् कृ ए
इकोयणचि	यण् प्राप्ते	
द्विर्वचनेऽचि	यण् निषेधे	
लिटि धातोरनभ्यासस्य	द्वित्वे कार्ये	स्पर्धाम् कृ कृ ए
उरत्	अत् आदेशे	
उरण् रपरः	इति सूत्रेण रपरत्वे	स्पर्धाम् कर् कृ ए
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	स्पर्धाम् क कृ ए
कुहोश्चुः	ककारस्य चकारे	स्पर्धाम् च कृ ए
इकोयणचि	इक् स्थाने यण् आदेशे	स्पर्धाम् च क्र् ए
	संयोगे	स्पर्धाम् चक्रे
~~मोऽनुस्वारः~~ नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	स्पर्धांचक्रे
अनुस्वारस्य ययि परसवर्णः	परसवर्णे	स्पर्धाञ्चक्रे इति सिद्धम्

32. स्पर्धांचक्रिरे

स्पर्ध धातोः

परोक्षे लिट्	लिट् लकारे, अनु० लोपे	स्पर्ध ल
इजादेश्च गुरुमतोऽनृच्छः	आम् आगमे	स्पर्ध आम् ल
आमः	लिट् लुकि	स्पर्ध आम्

31. स्पर्धाञ्चक्रे

स्पर्ध धातोः

परोक्षे लिट्	लिट् लकारे, अनु० लोपे	स्पर्ध ल
इजादेश्च गुरुमतोऽनृच्छः	आम आगमे	स्पर्ध आम ल
आमः	लिट लुकि	स्पर्ध आम
कृञ्चानुप्रयुज्यते लिटि	कृ धातु अनुप्रयोगे	स्पर्ध आम कृ
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य	आत्मनेपद संज्ञायाम्	
पुनः परोक्षे लिट्	लिट् लकारे, अनुलोपे	स्पर्धाम् कृ ल
तिप्तस्झिसिप्	त आदेशे	स्पर्धाम् कृ त
लिटस्तझयोरेशिरेच्	तकारस्य एश् आदेशे	स्पर्धाम कृ एश्
	अनुबन्धलोपे	स्पर्धाम कृ ए
इकोयणचि	यण् प्राप्ते	
द्विर्वचनेऽचि	यण् निषेधे	
लिटि धातोरनभ्यासस्य	द्वित्वे कार्ये	स्पर्धाम् कृ कृ ए
उरत्	अत् आदेशे	
उरण् रपरः	इति सूत्रेण रपरत्वे	स्पर्धाम कर् कृ ए
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	स्पर्धाम क कृ ए
कुहोश्चुः	ककारस्य चकारे	स्पर्धाम च कृ ए
इकोयणचि	इक् स्थाने यण् आदेशे	स्पर्धाम च क्र् ए
	संयोगे	स्पर्धाम च क्रे
~~मोऽनुस्वारः~~ नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	स्पर्धांचक्रे
अनुस्वारस्य ययि परसवर्णः	परसवर्णे	स्पर्धाञ्चक्रे इति सिद्धम्

32. स्पर्धाञ्चक्रिरे

स्पर्ध धातोः

परोक्षे लिट्	लिट् लकारे, अनु० लोपे	स्पर्ध ल
इजादेश्च गुरुमतोऽनृच्छः	आम् आगमे	स्पर्ध आम ल
आमः	लिट् लुकि	स्पर्ध आम

कृञ्चानुप्रयुज्यते लिटि	कृ अनुप्रयोगे	एधआम कृ
आम्प्रत्ययवत् कृञोऽनुप्रय...	आत्मनेपदसंज्ञायाम्	
तिप्तस्झि...	झ आदेशे	एधाम कृ झ
लिटस्तझयोरेशिरेच्	झ स्थाने इरेच् आदेशे अनु० लोपे	एधाम कृ इरेच्
	चण् प्राप्तायाम्	
द्विर्वचनेऽचि द्विर्वचनेऽचि	इति सूत्रेण बाधित्वा	
लिटि धातोरनभ्यासस्य	द्वित्वे कार्ये	एधाम कृ कृ इरे
उरत्	अत् आदेशे	
उरण् रपरः	इत्यनेन सूत्रेण रपरत्वे	एधाम कर् कृ इरे
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	एधाम क कृ इरे
कुहोश्चुः	ककारस्य चकारे	एधाम च कृ इरे
इकोयणचि	यण् कार्ये	एधाम चक्रिरे
मोऽनुस्वारः नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	एधांचक्रिरे
अनुस्वारस्य ययि परसवर्णः	परसवर्णे	एधाञ्चक्रिरे इति सिद्धम्

33. एधांचकृषे

	एध् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	एध ल
इजादेश्च गुरुमतोऽनृच्छः	आमागमे	एध आम ल
आमः	लिट् लुकि	एधाम
कृञ्चानुप्रयुज्यते लिटि	कृ अनुप्रयोगे	एधाम कृ
आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य	आत्मनेपद संज्ञायाम्	
पुनः परोक्षे लिट्	लिट् लकारे अनु० लोपे	एधाम कृ ल
तिप्तस्झिसिप्थस्थ.....	थास आदेशे	एधाम कृ थास
थासः से	थासः से आदेशे	एधाम कृ से
लिटि धातोरनभ्यासस्य	द्वित्वे	एधाम कृ कृ से
उरत्	अत् आदेशे	
उरण् रपरः	इत्यनेन सूत्रेण रपरत्वे	एधाम कर् कृ से

पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेष	एधाम् क कृ से
कुहोश्चुः	ककारस्य ~~चकारे~~ चकारे	एधाम् च कृ से
	षत्वे	एधाम् च कृ षे
आदेश प्रत्यययोः	आर्धधातुके संज्ञायाम्	
लिट् च	इडागमे प्राप्ते अति	
आर्धधातुकस्येड्वलादेः	इत्यनेन सूत्रेण निषेधे	एधाम् च कृ षे
कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि	मकारस्य अनुस्वारे	एधांचकृषे
मोऽनुस्वारः नश्चापदान्तस्य झलि		
अनुस्वारस्य ययि परसवर्णः	परसवर्णे	एधाञ्चकृषे इति सिद्धम्

३४. एधांचकृढ्वे

एध् धातोः

परोक्षे लिट्	लिट् लकारे । अनु० लोपे	एध् ल
इजादेश्च गुरुमतोऽनृच्छः	आमागमे	एध् आम् ल
आमः	लिट् लुकि	एध् आम्
कृञ्चानुप्रयुज्यते लिटि	कृ धातु अनुप्रयोगे	एधाम् कृ
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य	आत्मनेपद संज्ञायाम्	
पुनः परोक्षे लिट्	लिट् लकारे । अनु० लोपे	एधाम् कृ ल
तिप्तस्झि सिप्थस्थ...	लकारस्थाने ध्वम् आदेशे	एधाम् कृ ध्वम्
लिटि धातोरनभ्यासस्य	द्वित्वे	एधाम् कृ कृ ध्वम्
उरत्	अत् आदेशे	
उरण् रपरः	इत्यनेन सूत्रेण रपरत्वे	एधाम् कर् कृ ध्वम्
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	एधाम् क कृ ध्वम्
कुहोश्चुः	ककारस्य चकारे	एधाम् च कृ ध्वम्
मोऽनुस्वारः नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	एधांचकृध्वम्
अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे	एधाञ्चकृध्वम्
इणः षीध्वंलुङ्लिटां धोऽङ्गात्	धकारस्य ढकारे	एधाञ्चकृढ्वम्
टित आत्मनेपदानां टेरे	टेरेत्वे	एधाञ्चकृढ्वे इति सिद्धम्

35. एधिता

	एध् धातोः	
अनद्यतने लुट्	लुट् लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ....	~~तिबादि~~ लकारस्य त आदेशे	एध् त
स्यतासी लृलुटोः	तासागमे	एध् तास् त
लुटः प्रथमस्य डारौरसः	तकारस्य डा आदेशे। अनु० लोपे	एध् तास् आ
टेः	डित्वसामर्थ्यात् अभस्यापि टेर्लोपः	एध् त आ
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	एधिता
पुगन्तलघूपधस्य च	गुण प्राप्ते	
दीधीवेवीटाम्	इटि गुण निषेध आदेशे	एधिता इति सिद्धः

36. एधिताध्वे

	एध् धातोः	
अनद्यतने लुट्	लुट् लकारे अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ....	लकारस्य ध्वम् आदेशे	एध् ध्वम्
स्यतासी लृलुटोः	तासागमे	एध् तास् ध्वम्
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	एधितास् ध्वम्
धि च	सकार लोपे	एधिताध्वम्
टित आत्मनेपदानां टेरे	टेरेत्वे	एधिताध्वे इति सिद्धः

37. एधिताहे

	एध् धातोः	
अनद्यतने लुट्	लुट् लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ....	इडादेशे। अनु० लोपे	एध् इ
स्यतासी लृलुटोः	तासागमे	एध् तास् इ
आर्धधातुकं शेषः	आर्धधातुकं शेषः	
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	एधितास् इ
टित आत्मनेपदानां टेरे	टेरेत्वे	एधितास् ए
ह एति	सकारस्य हकारे	एधिताहे इति सिद्धः

३८. एधिष्येते

	एध धातोः	
लृट् शेषे च	लृट् लकारे, अनु० लोपे	एध ल
तिप्तस्झिसिप्थस्थ....	लकारस्य आताम् आदेशे	एध आताम्
स्यतासी लृलुटोः	स्य आगमे।	एधस्य आताम्
सार्वधातुकम् तिङ्शित्सार्वधातुकम् -	सार्वधातुक संज्ञायाम्	
सार्वधातुकमपित्	ङिद्भावे	
आतो ङितः	आकारस्य इय् आदेशे	एधस्य इय् ताम्
लोपो व्योर्वलि	यकार लोपे	एधस्य इ ताम्
आद्गुणः	गुण एकादेशे	एधस्येताम्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एधिस्येताम्
आदेशप्रत्यययोः	षत्वे	एधिष्येताम्
टित आत्मनेपदानां टेरे	टेरेत्वे	एधिष्येते इति सिद्धम्।

३९. एधताम्

	एध धातोः	
लोट् च	लोट् लकारे, अनु० लोपे	एध ल
तिप्तस्झिसिप्थस्थ....	लकारस्य त आदेशे	एध त
कर्तरि शप्	शबागमे, अनु० लोपे	एध अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	एधते
आमेतः	एकारस्य आमादेशे	एधताम् इति सिद्धम्।

४०. एधस्व

	एध धातोः	
लोट् च	लोट् लकारे, अनु० लोपे	एध ल
तिप्तस्झिसिप्थस्थ....	थास आदेशे	एध थास
थासः से	थासः स्थाने से आदेशे	एध से
कर्तरि शप्	शबागमे, अनु० लोपे	एध अ से
सवाभ्यां वामौ	एकारस्य वकारे	एध अ स व
	संयोगे	एधस्व इति सिद्धम्।

41. एधध्वम्

	एध् धातोः	
लोट् च	लोट्लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ...	लकारस्य ध्वम् आदेशे	एध् ध्वम्
कर्तरि शप्	शबागमे। अनु० लोपे	एध् अ ध्वम्
टित आत्मनेपदानां टेरे	टेरेत्वे	एधध्वे
सवाभ्यां वामौ	एकारस्य अमादेशे	एधध्वम् इति सिद्धम्

42. एधै

	एध् धातोः	
लोट् च	लोट् लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ...	इडागमे। अनु० लोपे	एध् इ
कर्तरि शप्	शबागमे। अनु० लोपे	एध अ इ
टित आत्मनेपदानां टेरे	टेरेत्वे	एध ए
एत ऐ आमेतः	आमादेशे प्राप्ते। परं तत् प्रबाध्य एकारस्य ऐकारे	एध ऐ
वृद्धिरेचि	वृद्धि एकादेशे	एधै इति सिद्धम्

43. एधावहै

	एध् धातोः	
लोट् च	लोट्लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थमिब्वस्मस्	...वहि आदेशे। अनु० लोपे	एध् वहि
कर्तरि शप्	शबागमे। अनु० लोपे	एध् अ वहि
टित आत्मनेपदानां टेरे	टेरेत्वे	एधवहे
अतो दीर्घो यञि	दीर्घे	एधावहे
आमेतः	एकारस्य अमादेशे प्राप्ते	
एत ऐ	तत् प्रबाध्य एकारस्य ऐकारे	एधावहै इति सिद्धम्

44. ऐधन्त

	एध् धातोः	
अनद्यतने लङ्	लङ्लकारे। अनु० लोपे	एध् ल
तिप्तस्झिसिप्थस्थ...	लकारस्य झ आदेशे	एध् झ

झोऽन्तः	झकारस्य अन्तादेश	एध अन्त
आडजादीनाम्	आडागमे, अनुलोपे	आ एध अन्त
कर्तरि शप्	शबागमे, अनुलोपे	आ एध अ अन्त
अतोगुणे	पररूपे	आ एध अन्त
वृद्धिरेचि आटश्च	वृद्धिआदेश	ऐधन्त इति सिद्धं।

५५. एधेत

	एध धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्नप्रार्थनेषु	लिङ् लकारे, अनुलोपे	एध ल
तिप्तस्झिसिप्थस्थ - - - - -	लकारस्य तकारे	एध त
कर्तरि शप्	शबागमे अनुलोपे	एध अ त
लिङः सीयुट्	सीयुडागमे, अनुलोपे	एध सीय् त
सुट् तिथोः	सुडागमे, अनुलोपे	एध सीय् स् त
लिङः सलोपोऽनन्त्यस्य	उभयोः सकारलोपे	एध ईय् त
लोपो व्योर्वलि	यकारलोपे	एध ई त
आद्गुणः	गुण एकादेश	एधेत इति सिद्धं।

29/12/2003

५६. एधेयाताम्

	एध धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्न	लिङ् लकारे, अनुलोपे	एध ल
तिप्तस्झिसिप्थस्थ - - -	लकारस्य आताम् आदेशे	एध आताम्
कर्तरि शप्	शबागमे, अनुलोपे	एध अ आताम्
लिङः सीयुट्	सीयुडागमे, अनुलोपे	एध सीय् आताम्
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	एध ईय् आताम्
आद्गुणः	गुण एकादेश	एधेय् आताम्
	संयोगे	एधेयातामिति सिद्धं।

५७. एधेरन्

	एध धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्न	लिङ् लकारे, अनुलोपे	एध ल
तिप्तस्झि	झ आदेश	एध झ

कर्तरि शप्	शबागमे, अनु० लोपे	एधअ अ
झोऽन्तः	अन्तादेश प्राप्ते	
झस्य रन्	तत् प्रबाध्य झस्य स्थाने रनादेशे	एध रन्
लिङः सीयुट्	सीयुडागमे, अनु० लोपे	एध सीय् रन्
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	एध ईय् रन्
आद् गुणः	गुण आदेशे	एधेय् रन्
लोपो व्योर्वलि	यकार लोपे	एधेरन् इति सिद्धं

४८. एधेय

	एध धातोः	
विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्न	लिङ् लकारे, अनु० लोपे	एध ल
तिप्तस्झिसिप्थस्थ. . . .	इडागमे, अनु० लोपे	एध इ
इटोऽत्	इट् स्थाने अत् आदेश, अनु० लोपे	एध अ
कर्तरि शप्	शबागमे, अनु० लोपे	एध अ अ
लिङः सीयुट्	सीयुडागमे, अनु० लोपे	एध सीय् अ
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	एध ईय् अ
आद् गुणः	गुणादेशे	एधेय इति सिद्धं

४९. एधिषीयास्ताम्

	एध धातोः	
आशिषि लिङ्लोटौ	आ० लिङ् लकारे, अनु० लोपे	एध ल्
तिप्तस्झिप्	लस्य आताम् आदेशे	एध आताम्
लिङाशिषि	आर्धधातुक संज्ञायाम्	
लिङः सीयुट्	सीयुडागमे, अनु० लोपे	एध् सीय् आताम्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एध् इ सीय् आताम्
सुट् तिथोः	सुडागमे, अनु० लोपे	एधइसीय् आस् ताम्
आदेशप्रत्यययोः	षत्वे	एधिषीयास्ताम्।

५०. एधिषीरन्

	एध धातोः	
आशिषि लिङ्लोटौ	आ० लिङ् लकारे, अनु० लोपे	एध ल

तिप्तस्झिसिप्थस्...	झ आदेशे	एध झ
झस्य रन्	झस्य रन् आदेशे	एध रन्
लिङः सीयुट्	सीयुडागमे, अनु० लोपे	एध सीयरन्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एधिसीयरन्
आदेश प्रत्यययोः	षत्वे	एधिषीयरन्
लोपो व्योर्वलि	यकारस्य लोपे	एधिषीरन्निति सिद्धम्।

५१. ऐधिष्ट

	एध् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	एध् ल
तिप्तस्झि....	लकारस्य तकारादेशे	एध त
कर्तरि शप्	शप् प्राप्ते	
च्लि लुङि	तत् बाध्य च्लि आगमे	एध च्लि त
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनु० लोपे	एध् स् त
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एधिस् त
आदेश प्रत्यययोः	षत्वे	एधिष् त
ष्टुना ष्टुः	ष्टुत्वे	एधिष्ट
आडजादीनाम्	आडागमे, अनु० लोपे	आ एधिष्ट
आटश्च	वृद्धि आदेशे	ऐधिष्टेति सिद्धम्।

५२. ऐधिषत

	एध् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	एध् ल
तिप्तस्झिसिप्....	लस्य झ आदेशे	एध झ
च्लि लुङि	च्लि आगमे	एध च्लि झ
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनु० लोपे	एध् स झ
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एधिस झ
आत्मनेपदेष्वनतः	झस्य अत् इत्यादेशे	एधिस अत्

आदेशप्रत्यययोः	षत्वे	एधिषत
आडजादीनाम्	आडागमे, अनु० लोपे	आ एधिषत
आटश्च	वृद्धि आदेशे	ऐधिषतेति सिद्धं।

53. ऐधिढ्वम्

	एध् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	एध् ल
तिप्तस्झिसिप्	लस्य ध्वम् आदेशे	एध् ध्वम्
आडजादीनाम्	आडागमे, अनु० लोपे	आ एध् ध्वम्
आटश्च	वृद्धि आदेशे	ऐध् ध्वम्
च्लि लुङि	च्लि आगमे	ऐध् च्लि ध्वम्
च्लेः सिच्	च्लेः स्थाने सिजादेशे अनु० लोपे	ऐध् स ध्वम्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	ऐधिस्ध्वम्
धि च	सकार लोपे	ऐधिध्वम्
इणः षीध्वंलुङ्लिटांधोऽङ्गात्	धकारस्य ढकारे	ऐधिढ्वम् इति सिद्धं।

54. ऐधिष्यथाः

	एध् धातोः	
लिङ् निमित्ते लृङ् क्रियातिपत्तौ	लृङ् लकारे, अनु० लोपे	एध् ल
तिप्तस्झिसिप्	लस्य थास् आदेशे	एध् थास्
स्यतासी लृलुटोः	स्य आगमे	एध् स्य थास्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	एधिस्य थास्
आदेशप्रत्यययोः	षत्वे	एधिष्य थास्
आडजादीनाम्	आडागमे, अनु० लोपे	आ एधिष्यथास्
आटश्च	वृद्धि आदेशे	ऐधिष्यथास्
	सस्य रुत्व विसर्गे	ऐधिष्यथाः इति सिद्धं।

Now अदादिगण पृष्ठ [illegible]

स्पर्ध धातोः
उ. स्पर्धते
५५.

	स्पर्ध धातोः	
वर्तमानेलट्	लट् लकारे। अनु० लोपे	स्पर्ध ल
तिप्तस्झिसिप्....	लस्य तकारे	स्पर्ध त
कर्तरि शप्	शबागमे। अनु० लोपे	स्पर्ध अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	स्पर्धते इति सिद्धः।

पस्पर्धे
५६.

	स्पर्ध धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	स्पर्ध ल
तिप्तस्झिसिप्....	लस्य तकारादेशे	स्पर्ध त
लिट् च	आर्धधातुक संज्ञायाम्	
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे। अनु० लोपे	स्पर्ध ए
लिटि धातोरनभ्यासस्य	द्वित्वे	स्पर्ध स्पर्ध ए
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे प्राप्ते	
शर्पूर्वाः खयः	तत् बाध्य खय् शेषे	पस्पर्ध ए
	संयोगे	पस्पर्धे इति सिद्धः।

स्पर्धेत
५७.

	स्पर्ध धातोः	
~~परोक्ष~~विधिनिमन्त्रणामन्त्रणाध...	लिङ् लकारे। अनु० लोपे	स्पर्ध ल
तिप्तस्झिसिप्....	लस्य तकारादेशे	स्पर्ध त
लिङः सीयुट्	सीयुडागमे। अनु० लोपे	स्पर्ध सीय् त
लिङः सलोपोऽनन्त्यस्य	सकार लोपे	स्पर्ध ईय् त
कर्तरि शप्	शबागमे। अनु० लोपे	स्पर्ध अ ईय् त
आद् गुणः	गुणादेशे	स्पर्धेय् त
लोपो व्योर्वलि	यकार लोपे	स्पर्धेत इति सिद्धः।

4. दध् धातोः

58. देधे

	दध् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	दध् ल
तिप्तस्झिसिप्थस्थ....	लकारस्य तकारादेशे	दध् त
लिट् च	आर्धधातुकं संज्ञायाम्	
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे। अनु० लोपे	दध् ए
लिटि धातोरनभ्यासस्य	द्वित्वे	दध् दध् ए
असंयोगाल्लिट् कित्	कित्वे	
अत एकहल्मध्येऽनादेशादेर्लिटि	~~एत्वे अभ्यास लोपे~~ एत्वे अभ्यासलोपे च	देधे इति सिद्धः

5. स्कुदि - स्कुद् धातोः

59. स्कुन्दते

	स्कुद् धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	स्कुद् ल
तिप्तस्झिसिप्....	लकारस्य तकारे	स्कुद् त
कर्तरि शप्	शबागमे। अनु० लोपे	स्कुद् अ त
इदितो नुम् धातोः	नुमागमे। अनु० लोपे	स्कुन्दत
टित आत्मनेपदानां टेरे	टेरेत्वे	स्कुन्दते इति सिद्धः

60. चुस्कुन्दे

	स्कुद् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	स्कुद् ल
तिप्तस्झिसिप्....	तकारादेशे	स्कुद् त
इदितो नुम् धातोः	नुमागमे। अनु० लोपे	स्कुन्द् त
लिटि धातोरनभ्यासस्य	द्वित्वे	स्कुन्द् स्कुन्द् त
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम्	
हलादिः शेषः	आदिहल शेषे प्राप्ते, परं	
शर्पूर्वाः खयः	तदभ्यासखयः शेषे (अ न्त) शेषे	कु स्कुन्द् त
कुहोश्चुः	ककारस्य चकारे	चुस्कुन्द् त
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे। अनु० लोपे	चुस्कुन्दे इति सिद्धः

६. ददधातोः
६१. दददाते

	ददधातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	ददल
तिप्तस्झिसिप्थस्थ....	लकारस्य ~~तकारे~~ आताम् आदेशे	दद आताम्
लिट् च	आर्धधातुकी संज्ञायाम्	
~~लिट्यभ्यासस्योभयेषाम्~~		
लिटि धातोरनभ्यासस्य	द्वित्वे	ददददआताम्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
अत एकहल्मध्येऽनादेशादेर्लिटि	एत्वाभ्यास लोपे प्राप्ते परं	
न शसददवादिगुणानाम्	इत्यनेन निषेधे	दद दद आताम्
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	दद्द आताम्
टित आत्मनेपदानां टेरे	टेरेत्वे	दददाते इति सिद्धं।

७. स्वद् धातोः
६२. अनुस्वदते

	स्वद्धातोः	
धात्वादेः षः सः	षकारस्य सकारे	अनु स्वद्
वर्तमाने लट्	लट् लकारे। अनु० लोपे	अनुस्वद्‌ल
तिप्तस्झिसिप्थस्थ....	तकारादेशे	अनुस्वद्‌त
कर्तरि शप्	शबागमे। अनु० लोपे	अनुस्वद्‌अत
टित आत्मनेपदानां टेरे	टेरेत्वे	अनुस्वदते इति सिद्धं।

८. उर्द् धातोः
६३. ऊर्दते

	उर्द् धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	उर्द् ल
तिप्तस्झिसिप्थस्थ....	लस्य तकारादेशे	उर्द् त
उपधायां च	इक् दीर्घे	ऊर्द् त

कर्तरि शप्	शबागमे, अनुबन्धलोपे	ऊर्द् अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	ऊर्दते इति सिद्धम्

६४. ऊर्दाञ्चक्रे

	ऊर्द् धातोः	
उपधायां च	उपधा दीर्घे	ऊर्द्
परोक्षे वर्तमाने लिट्	लिट् लकारे, अनुबन्धलोपे	ऊर्द् ल
~~तिप्तस्झि सिप्थस्थ....~~	~~लस्य तकारादेशो~~	~~ऊर्द् त~~
~~लिटस्तझयोरेशिरेच्~~ ~~इजादेश्च गुरुमतो~~	आमागमे	ऊर्द् आम ल
आमः	लिट् लुकि	ऊर्द् आम
कृञ्चानुप्रयुज्यते लिटि	कृ अनुप्रयोगे	ऊर्दाम कृ
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य	आत्मनेपद संज्ञायाम्	
पुनः परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	ऊर्दाम कृ ल
तिप्तस्झिसिप्....	तकारादेशे	ऊर्दाम कृ त
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे	ऊर्दाम कृ ए
इको यणचि	यण् प्राप्ते परं	
द्विर्वचनेऽचि	इत्यनेन सूत्रेण तत् निषेध	
लिटि धातोरनभ्यासस्य	द्वित्वे	ऊर्दाम कृ कृ ए
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
उरत्	अत् आदेशे	
उरण् रपरः	इत्यनेन रपरत्वे	ऊर्दाम कर् कृ ए
हलादिः शेषः	आदि हल् शेषे	ऊर्दाम क कृ ए
कुहोश्चुः	ककारस्य चकारे	ऊर्दाम च कृ ए
इको यणचि	इक् स्थाने यणादेशे	ऊर्दाम च क्रे
मोऽनुस्वारः नश्चापदान्तस्य झलि	अनुस्वारे	ऊर्दां चक्रे
अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे	ऊर्दाञ्चक्रे इति सिद्धम्

अत् धातोः

६५. अतति

	अत् धातोः	
वर्तमाने लट्	लट् लकारे, अनुबन्धलोपे	अत् ल

तिप्तस्झि....	लस्य तिबादेशे। अनु० लोपे	अत् ति
तिङ्शित्सार्वधातुकम्	सार्वधातुक संज्ञायाम्	
कर्तरि शप्	शबागमे। अनु० लोपे	अत अति
	संयोगे	अतति इति सिद्धं।

६६' आत

	अत् धातोः	
परोक्षेलिट्	लिट् लकारे। अनु० लोपे	अत् ल
तिप्तस्झिसिप्....	लस्य तिबादेशे। अनु० लोपे	अत् ति
शेषात्कर्तरि परस्मैपदानि	परस्मैपद संज्ञायाम्	
परस्मैपदानां णलतुसुस्थलथुस	तिप् स्थाने णलादेशे। अनु० लोपे	अत् अ
लिटिधातोरनभ्यासस्य	द्वित्वे	अत् अत् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	अ अत् अ
अत आदेः	अकारस्य दीर्घे	आ अत् अ
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	आत इति सिद्धं।

६७. आतीत

	अत् धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	अत् ल
तिप्तस्झिसिप्....	लस्य स्थाने तिबादेशे अनु० लोपे	अत् ति
कर्तरि शप्	शप् प्राप्ते परे	
च्लि लुङि	च्लि आगमे	अत् च्लि ति
च्लेः सिच्	सिजादेशे। अनु० लोपे	अत् सति
आडजादीनाम्	आडागमे। अनु० लोपे	आ अत् सति
आटश्च	वृद्धि आदेशे	आत् सति
इतश्च	इकार लोपे	आत् स त
अस्तिसिचोऽपृक्ते	ईडागमे। अनु० लोपे	आत् स ईत
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	आत् इस ईत
इट ईटि	सकार लोपे	आत् इ ईत
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	आतीत इति सिद्धं।

६८. आतिष्टाम्

	अत् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	अत् ल
तिप्तस्झिसिप्....	लस्य स्थाने ~~तिप्~~ तस् आदेशे अनु० लोपे	अत् ~~ति~~ तस्
~~इतश्च~~	~~इकार लोपे~~	~~अत् त~~
आडजादीनाम्	आडागमे, अनु० लोपे	आ अत् तस्
आटश्च	वृद्धि एकादेशे	आतस्
कर्तरि शप्	शप् प्राप्ते परं	
च्लि लुङि	च्लि आगमे	आत् च्लि तस्
च्लेः सिच्	च्लेः स्थाने सिजादेशे अनु० लोपे	आत् स् तस्
तस्थस्थमिपां तांतंतामः	तस् स्थाने ताम् आदेशे	आत् स् ताम्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	आतिस्ताम्
आदेशप्रत्यययोः	सकारस्य षकारे	आतिष्ताम्
ष्टुना ष्टुः	ष्टुत्वे	आतिष्टामिति सिद्धम्

६९. आतिषुः

	अत् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	अत् ल
तिप्तस्झिसिप्थस्थ....	लस्य स्थाने झि आदेशे	अत् झि
सिजभ्यस्तविदिभ्यश्च	झि स्थाने जुस् आदेशे, अनु० लोपे	अत् उस्
च्लि लुङि	च्लि आगमे	अत् च्लि उस्
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनु० लोपे	अत् स् उस्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	अत् इ स् उस्
आदेशप्रत्यययोः	षत्वे, संयोग	अतिषुस्
आडजादीनाम्	आडागमे, अनु० लोपे	आ अतिषुस्
आटश्च	वृद्धि एकादेशे	आतिषुस्
	सस्य रुत्व विसर्गे	आतिषुः इति सिद्धम्

७०. च्युतिर् - च्युत् धातोः

७०. च्योतति

	च्युत धातोः	
वर्तमाने लट्	लट् लकारे । अनु० लोपे	च्युत ल
तिप्तस्झि...	तिबादेशे । अनु० लोपे	च्युत ति
पुगन्तलघूपधस्य च	गुणादेशे	च्योत ति
तिङ्शित्सार्वधातुकं	सार्वधातुके संज्ञायाम्	
कर्तरि शप्	शबागमे । अनु० लोपे	च्योत अति
	संयोगे	च्योततीति सिद्धम्।

७१. चुच्योत

	च्युत धातोः	
परोक्षे लिट्	लिट् लकारे । अनु० लोपे	च्युत ल
तिप्तस्झिसिप्थस्थ...	तिबादेशे	च्युत तिप्
शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
परस्मैपदानां णलतुसुस्...	तिप् स्थाने णलादेशे । अनु० लोपे	च्युत अ
लिटि धातोरनभ्यासस्य	द्वित्वे	च्युत च्युत अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	चुच्युत
पुगन्तलघूपधस्य च	उपधागुणे	चुच्योतेति सिद्धम्।

७२. अच्युतत् / अच्योतीत्

	च्युत धातोः	
लुङ्	लुङ् लकारे । अनु० लोपे	च्युत ल
तिप्तस्झिसिप्थस्थ...	तिबादेशे । अनु० लोपे	च्युत ति
इतश्च	इकारस्य लोपे	च्युत त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे । अनु० लोपे	अच्युत त
च्लि लुङि	च्लि आगमे	अच्युत च्लि त
इरितो वा	विकल्पेन च्लेः स्थाने अङ्	
	आदेशे । अनु० लोपे	अच्युत अत
पुगन्तलघूपधस्य च	गुण प्राप्ते परं	
क्ङिति च	इत्यनेन निषेधे	अच्युतत् इति सिद्धम्

	अड़भाव पक्षे	
च्लेः सिच्	सिजादेशे, अनु० लोपे	अच्युत च्लि त
अस्तिसिचोऽपृक्ते	ईडागमे, अनु० लोपे	अच्युत स त
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	अच्युत स ई त
इट ईटि	सकार लोपे	अच्युत इ स ई त
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	अच्युत इ ई त
पुगन्तलघूपधस्य च	अधा गुण आदेशे	अच्युतीत
		अच्योतीतिति सिद्धं।

11. मन्थ् धातोः
13. मथ्यात

	मन्थ् धातोः	
आशिषि लिङ्लोटौ	आशीर्लिङ् लकारे, अनु० लोपे	मन्थ् ल
तिप्तस्झिसिप्मस्थ...	तिबादेशे, अनु० लोपे	मन्थ् ति
इतश्च	इकार लोपे	मन्थ् त
लिङाशिषि	आर्धधातुक संज्ञायाम्	
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनु० लोपे	मन्थ्यास त
स्कोः संयोगाद्योरन्ते च	सकार लोपे	मन्थ्यात
किदाशिषि	कित्वे	
अनिदितां हल उपधायाः क्ङिति	नकार लोपे	मथ्यात इति सिद्धं

12. षिध् धातोः
14. सेधति

	षिध् धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	षिध् ल
तिप्तस्झिसिप्...	तिबादेशे, अनु० लोपे	षिध् ति
धात्वादेः षः सः	षकारस्य सकारे	सिध् ति
पुगन्तलघूपधस्य च	गुणे	सेध् ति
तिङ् शित्सार्वधातुकम्	सार्वधातुक संज्ञायाम्	
कर्तरि शप्	शबागमे, अनु० लोपे	सेध् अ ति
	संयोगे	सेधति इति सिद्धं।

९५. सिषेध

	षिध धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
~~वर्तमाने लट्~~ परोक्षेलिट्	लिट् लकारे, अनुबन्धलोपे	सिध ल
~~तिप्तस्झि~~ शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झिसिप्थस्थ....	तिबादेशे	सिध तिप्
परस्मैपदानां णलतुसुस्थलथु...	तिप् स्थाने णलादेशे, अनुबन्धलोपे	सिध अ
लिटिधातोरनभ्यासस्य	द्वित्वे	सिध सिध अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	सि सिध
पुगन्तलघूपधस्य च	गुणे	सि सेध
आदेश प्रत्यययोः	सकारस्य षकारे	सिषेधेति सिद्धं।

९६. सेधिता

	षिध धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
अनद्यतने लुट्	लुट् लकारे, अनुबन्धलोपे	सिध ल
शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झि सिप्थस्थ	तिबादेशे	सिध तिप्
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे अनुबन्धलोपे	सिध आ
स्यतासी लृलुटोः	तासागमे	सिध तास् आ
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनुबन्धलोपे	सिधितास् आ।
टेः	डित्सामर्थ्याद् अभस्यापि टेर्लोपः	सिधित् आ
पुगन्तलघूपधस्य च	उपधा गुणे	सेधिता इति सिद्धं।

९७. असेधीत

	षिध धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
पुगन्तलघूपधस्य च	उपधा गुणे	सेध

लुङ्	लुङ्लकारे, अनुबन्धलोपे	सेधल्
तिप्तस्झिसिप् ...	तिबादेशे, अनुबन्धलोपे	सेधति
इतश्च	इकारस्यलोपे	सेधत्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	असेधत्
च्लि लुङि	च्लि आगमे	असेधच्लित्
च्लेः सिच्	सिजादेशे, अनुबन्धलोपे	असेधस् त्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायां	
आर्धधातुकस्येड्वलादेः	इडागमे, अनुबन्धलोपे	असेधिस् त्
अस्तिसिचोऽपृक्ते	ईडागमे, अनुबन्धलोपे	असेधिस् ईत्
इट ईटि	सकार लोपे	असेधिईत्
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	असेधीत् इति सिद्धम्

13. षिधू - षिध धातोः

18. सिषेद्ध / सिषेधिथ

	षिध धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	सिधल्
शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झिसिप् ...	सिबादेशे,	सिध सिप्
पुगन्तलघूपधस्य च	उपधा गुणादेशे	सेध सिप्
परस्मैपदानां णलतुसुस्थल...	थलादेशे, अनुबन्धलोपे	सेध थ
लिटि धातोरनभ्यासस्य	द्वित्वे	सेध सेध थ
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	से सेध थ
ह्रस्वः	ह्रस्वे	सि सेध थ
आदेशप्रत्यययोः	सकारस्य षकारे	सिषेध थ
~~स्वरति सूति सूयति धूञूदितो वा~~	~~विकल्पेन इडागमम्~~	~~सि~~
आर्धधातुकं शेषः	आर्धधातुके संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	नित्य इट् प्राप्ते परं	
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे	सिषेधिथ इति सिद्धम् (1)

	इडभावपक्षे	सिषेध् थ
झषस्तथोर्धोऽधः	थकारस्य धकारे	सिषेध् ध
झलां जश् झशि	पूर्वधकारस्य दकारे	सिषेद्ध इति रूपं (2)

१९. सेद्धा / सेधिता

	सिध् धातोः	
अनद्यतने लुट्	लुट् लकारे, अनु० लोपे	षिध् ल
तिप्तस्झिसिप्थस्...	तिबादेशे,	षिध् तिप्
धात्वादेः षः सः	षकारस्य सकारे	सिध् तिप्
पुगन्तलघूपधस्य च	गुणादेशे	सेध् तिप्
स्यतासी लृलुटोः	तासागमे	सेध् तास् तिप्
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	डा आदेशे, अनु० लोपे	सेध् तास् आ
टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	सेध् त् आ
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे, अनु० लोपे	सेधिता इति सिद्धं (1)
	इडभावे	सेध् ता
झषस्तथोर्धोऽधः	तकारस्य धकारे	सेध् धा
झलां जश् झशि	पूर्व धकारस्य दकारे	सेद्धा इति रूपं (2)

२०. सेत्स्यति / सेधिष्यति

	सिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध्
लृट् शेषे च	लृट् लकारे, अनुबन्धलोपे	सिध् ल
शेषात्कर्तरि परस्मैपदम्	परस्मैपद संज्ञायाम्	
तिप्तस्झिसिप्थस्...	तिबादेशे, अनुबन्धलोपे	सिध् ति
पुगन्तलघूपधस्य च	गुणे	सेध् ति
स्यतासी लृलुटोः	स्य आगमे	सेध् स्यति
आर्धधातुकं शेषः	आर्धधातुकसंज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे, अनुबन्धलोपे	सेधिस
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे, अनु० लोपे	सेध् इस्यति

आदेशप्रत्यययोः	सकारस्य षकारे	सेधिष्यति इतिरूपं (1)
~~झलां जशोऽन्ते~~ खरि च	इडभाव पक्षे ~~अभावे~~	सेध्स्यति ~~सेद्स्यति~~ सेत्स्यति इतिरूपं (2)

८१. ~~असैत्सीत्~~ असैत्सीत् / असेधीत्

	षिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध्
लुङ्	लुङ् लकारे। अनु॰ लोपे	सिध् ल
तिप्तस्झिसिप्थस्थ...	लस्य स्थाने तिबादेशे। अनु॰ लोपे	सिध् ति
~~पुगन्तलघूपधस्य च~~	~~उपधा गुणे~~	~~सेधति~~
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु॰ लोपे	असिध् ति
च्लि लुङि	च्लि आगमे	असिध् च्लि ति
च्लेः सिच्	सिजादेशे। अनु॰ लोपे	असिध् स् ति
वदव्रजहलन्तस्याचः	वृद्धि आदेशे	असैध् स् ति
इतश्च	इकार लोपे	असैध् स् त्
अस्तिसिचोऽपृक्ते	ईडागमे। अनु॰ लोपे	असैध् सीत्
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडादेशे, तस्य अभावे पक्षे	असैध् सीत्
खरि च	धकारस्य चर्त्वम्	असैत्सीत् इतिरूपं (1)
	इडभावे अनु॰ लोपे	असिध् इस् ईत्
इट ईटि	सकार लोपे	असिध् इ ई त्
अकः सवर्णे दीर्घः	दीर्घे	असिधीत्
पुगन्तलघूपधस्य च	उपधा गुणः	असेधीतितिरूपं (2)

८२. असैद्धाम् / ~~असेधीताम्~~

	षिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध्
लुङ्	लुङ् लकारे। अनु॰ लोपे	सिध् ल
तिप्तस्झिसिप्...	तसादेशे	सिध् तस्
तस्थस्थमिपां तांतंतामः	तस स्थाने तामादेशे	सिध् ताम्
~~लङ्~~ लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु॰ लोपे	असिध् ताम्

वदव्रजहलन्तस्याचः	उपधावृद्धि आदेशे	असैधताम
च्लि लुङि	च्लि आगमे	असैध च्लि ताम
च्लेः सिच्	सिजादेशे। अनुबन्धलोपे	असैध स् ताम
~~अस्ति सिचोऽपृक्ते~~	~~ईडागमे। अनुबन्धलोपे~~	~~असैधस् ई ताम~~
झलो झलि	सकारलोपे	असैध ताम
झषस्तथोर्धोऽधः	तकारस्य धकारे	असैध धाम
झलां जश् झशि	पूर्वधकारस्य दकारः	असैद्धाम
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडभावे	असैद्धाम इति सिद्धम् (1)
	इड्भाव पक्षे	असिध इ स् ताम
~~इट ईटि अस्तिसिचोऽपृक्ते~~	ईडागमे। अनुबन्धलोपे	असिध इ स् ई ताम
इट ईटि	सकार लोपे	असिध इ ई ताम
पुगन्तलघूपधस्य च	गुणे	असेध इ ई ताम
अकः सवर्णे दीर्घः	सवर्णदीर्घे	असेधीताम् इति सिद्धम् (2)

८३. असैत्सुः

षिध धातोः

धात्वादेः षः सः	षकारस्य सकारे	सिध
लुङ्	लुङ्लकारे। अनुबन्धलोपे	सिध ल्
तिप्तस्झिसिप्थस्थ...	लस्य झि आदेशे	सिध झि
~~लुङ्~~ लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनुबन्धलोपे	असिध झि
च्लि लुङि	च्लि आगमे	असिध च्लि झि
च्लेः सिच्	च्लेः स्थाने सिच् अनुबन्धलोपे	असिध स झि
सिजभ्यस्तविदिभ्यश्च	झि स्थाने जुस आदेशे। अनुबन्धलोपे	असिध स उस
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इट्। तस्य अभावे	असिध सुस
खरि च	धकारस्य चर्त्वम्	असित्सुस
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैत्सुस
	सस्य रुत्व विसर्गे	असैत्सुः इति सिद्धम् (1)
	इड्भावपक्षे	असिध इ सुस
पुगन्तलघूपधस्य च	गुणे	असेधिसुस
आदेशप्रत्यययोः	सकारस्य षकारे	असेधिषुस
	सस्य रुत्वविसर्गे	असेधिषुः इति रूपम् (2)

८४. असैत्सीः / असेधीः

	सिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
लुङ्	लुङ् लकारे। अनु॰ लोपे	सिध ल
तिप्तस्झिसिप्थस्थ....	सिबादेशे। अनु॰ लोपे	सिध सि
इतश्च	इकार लोपे	सिध स
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु॰ लोपे	असिध स
च्लि लुङि	च्लि आगमे	असिध च्लि स
च्लेः सिच्	च्लेः स्थाने सिजादेशे अनु॰ लोपे	असिध स स
अस्तिसिचोऽपृक्ते	ईडागमे। अनु॰ लोपे	असिधसीस
स्वरतिसूतिसूयतिधूञूदितो वा	इडागमे विकल्पे तस्य अभावे पक्षे	असिधसीस
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैध सीस
खरि च	धकारस्य चर्त्वम्	असैत् सीस
	सस्य रुत्व विसर्गे	असैत्सीः इति सिद्धं
	इट् भाव पक्षे	असिध् ईसीस
पुगन्तलघूपधस्य च	गुणे	असेधिसीस
इट ईटि	सकारलोपे	असेधिईस
अकः सवर्णे दीर्घः	दीर्घे	असेधीस
	सस्य रुत्व विसर्गे	असेधीः इति रूपं

८५. असैद्धम्

	सिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
लुङ्	लुङ् लकारे। अनु॰ लोपे	सिध ल
तिप्तस्झिसिप्थस्थ....,	लस्य थसादेशे	सिध थस
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु॰ लोपे	असिध थस
तस्थस्थमिपां तांतंतामः	थस स्थाने तमादेशे	असिध तम
च्लि लुङि	च्लि आगमे	असिध च्लि तम
च्लेः सिच्	च्लेः स्थाने सिजादेशे अनु॰ लोपे	असिध स तम

स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे प्राप्ते तस्य अभावपक्षे	असिध्स्तम्
झलो झलि	सकारलोपे	असिध्तम्
झषस्तथोर्धोऽधः	तकारस्य धकारे	असिध्धम्
झलां जश् झशि	धकारस्य दकारे	असिद्धम्
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैद्धमिति सिद्धं ①
	इट् भावपक्षे	असिध् इस् तम्
पुगन्तलघूपधस्य च	गुणादेशे	असेधिस्तम्
आदेशप्रत्यययोः	सकारस्य षकारे	असेधिष्तम्
ष्टुना ष्टुः	ष्टुत्वे	असेधिष्टम् इति रूपं ②

२६. असैद्ध

	षिध धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध
लुङ्	लुङ्लकारे, अनुबन्धलोपे	सिध् ल
तिप्तस्झिसिप्थस्थ ←---	लस्य स्थाने थ आदेशे	सिध् थ
तस्थस्थमिपां तांतंतामः	थस्य स्थाने तकार आदेशे	सिध् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	असिध् त
च्लि लुङि	च्लि आगमे	असिध् च्लि त
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनुबन्धलोपे	असिध् स् त
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पे इडागमे प्राप्ते।	
	अभावपक्षे	असिध् स त
झलो झलि	सकारलोपे	असिध् त
झषस्तथोर्धोऽधः	तकारस्य धकारे	असिध् ध
झलां जश् झशि	पूर्वधकारस्य दकारे	असिद्ध
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैद्धेति सिद्धं ①
	इट् भावपक्षे	असिध् इस् त
पुगन्तलघूपधस्य च	उपधा गुणे	असेधिस् त
आदेशप्रत्यययोः	सकारस्य षकारे	असेधिष्त
ष्टुना ष्टुः	ष्टुत्वे	असेधिष्टेति रूपं ②

८७. असैत्सम्

	षिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध्
लुङ्	लुङ् लकारे, अनुबन्धलोपे	सिध्ल
तिप्तस्झिसिप्...	सिबादेशे	सिध् सिप्
तस्थस्थमिपां तांतंतामः	मिप् स्थाने अम् आदेशे	सिध् अम्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	अ सिध् अम्
च्लि लुङि	च्लि आगमे	अ सिध् च्लि अम्
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनुबन्धलोपे	असिध् स् अम्
स्वरतिसूतिसूयतिधूञूदितो वा	इडागमो विकल्पेन प्राप्ते,	
	इड् अभाव पक्षे	असिध् स् अम्
खरि च	धकारस्य तकारे	असित्सम्
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैत्सम् इति सिद्धं ①
	इट् भाव पक्षे	अ सिध् इस् अम्
पुगन्तलघूपधस्य च	उपधा गुणे	असेधिस् अम्
आदेशप्रत्यययोः	सकारस्य षकारे	असेधिषम् इति रूपं ②

८८. असैत्व

	षिध् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सिध्
लुङ्	लुङ् लकारे, अनुबन्धलोपे	सिध् ल
तिप्तस्झिसिप्थस्थ...	वसादेशे	सिध् वस्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे	अ सिध् वस्
नित्यं ङितः	सकार लोपे	अ सिध् व
च्लि लुङि	च्लि आगमे	अ सिध् च्लि व
च्लेः सिच्	च्लेः स्थाने सिजादेशे, अनुबन्धलोपे	अ सिध् स् व
स्वरतिसूतिसूयतिधूञूदितो वा	इडागमो विकल्पेन प्राप्ते इड् अभावे	
खरि च	धकारस्य तकारे	असित्स्व
वदव्रजहलन्तस्याचः	उपधा वृद्धि आदेशे	असैत्स्व
झलो झलि	सकारलोपे	असैत्वेति सिद्धं
	इट् भाव पक्षे	असिध् इस् व

पुगन्तलघूपधस्य च	उपधा गुण	असेध् इस् व
आदेशप्रत्यययोः	सकारस्य षकारे	असेधिष्वेतिरूपम्

१४. खाद् धातोः

५९. खादति

खाद् धातोः

वर्तमाने लट् — लट् लकारे, अनु० लोप — खाद् ल

तिप्तस्झिसिप्थस्थ . . . — तिबादेशे, अनु० लोप — खाद् ति

तिङ्शित्सार्वधातुकम् — सार्वधातुक संज्ञायाम् — खाद् ति

कर्तरि शप् — शबागमे, अनु० लोप — खाद् अ ति

संयोगे — खादतीति सिद्धम्।

६०. चखाद

खाद् धातोः

परोक्षे लिट् — लिट् लकारे, अनु० लोप — खाद् ल

शेषात्कर्तरि परस्मैपदं — परस्मैपद संज्ञायाम्

तिप्तस्झिसिप् . . . — तिबादेशे — खाद् तिप्

परस्मैपदानां णलतुसुस्थलथुसण — तिप् स्थाने णलादेशे, अनु० लोप — खाद् अ

लिटि धातोरनभ्यासस्य — द्वित्वे — खाद् खाद् अ

पूर्वोऽभ्यासः — पूर्वस्य अभ्यास संज्ञायाम्

हलादिः शेषः — आदि हल् शेषे — ख खाद

~~अभ्यासे चर्च~~ कुहोश्चुः — ~~चर्त्वे~~ खकारस्य छकारे — ~~चखाद खादेति सिद्धम्~~

कुहोश्चुः अभ्यासे चर्च — छकारस्य चकारे — चखादेति सिद्धम्

१५. खद् धातोः

६१. खदति

खद् धातोः

वर्तमाने लट् — लट् लकारे, अनु० लोप — खद् ल

तिप्तस्झिसिप् . . . — तिबादेशे, अनु० लोप — खद् ति

कर्तरि शप् — शबागमे, अनु० लोप — खद् अ ति

संयोगे — खदतीति सिद्धम्।

६२. चखाद

खद् धातोः

परोक्षे लिट् — लिट् लकारे, अनु० लोप — खद् ल

शेषात्कर्तरि परस्मैपदं	परस्मैपदसंज्ञायाम्	
तिप्तस्झिसिप्थस्थ	तिबादेशे	खद् तिप्
परस्मैपदानां णलतुसुस्थलथुस्	तिप् स्थाने णलादेशे, अनुबन्धलोपे	खद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	खद् खद् अ
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
हलादि शेषः	आदि हल शेषे	खखद् अ
कुहोश्चुः अभ्यासे चर्च	खकारस्य छकारे ~~चर्त्वे~~ छकारस्य ~~ककारस्य~~ चकारे	छखद
अत उपधायाः	उपधा वृद्धयाम्	चखद
		चखादेति सिद्धम्।

63. चखाद / चखद

	खद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	खद् ल
तिप्तस्झिसिप्	मिबादेशे	खद् मिप्
परस्मैपदानां णलतुसुस्थलथुस्	मिप् स्थाने णल् आदेशे अनुबन्धलोपे	खद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	खद् खद् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादि शेषः	आदि हल शेषे	खखद
~~अभ्यासे चर्च~~	~~खकारस्य ककारे~~	~~कखद~~
कुहोश्चुः अभ्यासे चर्च	~~ककारस्य चकारे~~ खकारस्य छकारे छकारस्य चकारे	~~कखद~~ छखद चखद
णलुत्तमो वा अत उपधायाः	उपधा वृद्धयाम् परं	चखद
	विकल्पेन णित्त्वं अतः	चखद (1)
	वृद्धौ पक्षे	चखाद (2) इति सिद्धम्।

64. अखादीत् / अखदीत्

	खद् धातोः	
लुङ् ~~लकारे~~	लुङ् लकारे, अनुबन्धलोपे	खद् ल
तिप्तस्झिसिप्थस्थमिब्वस्,	लस्य तिबादेशे, अनुबन्धलोपे	खद् ति
इतश्च	इकारलोपे	खद् त्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	अखद् त
च्लि लुङि	च्लि आगमे	अखद् च्लि त

च्लेः सिच्	च्लेः स्थाने सिजादेशे। अनु० लोपे	अखद् स् त
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	अखद् इस् त
अस्तिसिचोऽपृक्ते	ईडागमे। अनु० लोपे	अखद् इस् ईत
अतो हलादेर्लघोः	विकल्पेन वृद्धि आदेशे	अखाद् इस् ईत
इट ईटि	सकार लोपे	अखाद् इ ईत
अकः सवर्णे दीर्घः	सवर्णदीर्घे	(1) अखादीत् इति सिद्धं
	वृद्धि अभाव पक्षे	(2) अखदीत् इति रूपं।

ध: बद्धातोः
बबाद

६५.

	बद् धातोः	
परोक्षे लिट् ।	लिट् लकारे। अनु० लोपे	बद् ल
तिप्तस्झिसिप्...	तिबादेशे	बद् तिप्
परस्मैपदानां णलतुसुस्थलथुण	तिप् स्थाने णलादेशे। अनु० लोपे	बद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	बद् बद् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	बबद
अत उपधायाः	उपधा वृद्धि आदेशे	बबादेति सिद्धं।

६६: बेदतुः

	बद् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	बद् ल्
तिप्तस्झिसिप्थस्थमिप्...	लस्य स्थाने तसादेशे	बद् तस्
परस्मैपदानां णलतुसुस्थलथुस...	तस् स्थाने अतुस् आदेशे	बद् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	बद् बद् अतुस्
असंयोगाल्लिट् कित्	कित्वे	
अत एकहल्मध्येऽनादेशादेर्लिटि	अभ्यास लोपे अकारस्य एकारे	बेदतुस्
	सस्य रुत्व विसर्गे	बेदतुः इति सिद्धं।

६६. बेदिथ

	बद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	बद् ल
तिप्तस्झिसिप् ...	लस्य सिबादेशे,	बद् सिप्
परस्मैपदानां णलतुसुस्थल...	सिप् स्थाने थलादेशे	बद् थल
	अनुबन्ध लोपे	बद् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	बद् बद् थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
थलि च सेटि	अभ्यास लोपे अकारस्य एकार आदेशे	बेद् थ
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	बेदिथेति सिद्धं।

६७. बबाद / बबद

	बद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	बद् ल
तिप्तस्झिसिप् ...	लस्य सिबादेशे	बद् सिप्
परस्मैपदानां णलतुसुस्थल...	सिप् स्थाने णलादेशे, अनु० लोपे	बद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	बद् बद् अ
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	ब बद् अ
णलुत्तमो वा	विकल्पेन णिद्भावे	
	णित् अभाव पक्षे	बबद इति सिद्धं (1)
	णित् भाव पक्षे	बबद
अत उपधायाः	वृद्धि आदेशे	बबादेति रूपं (2)

६८. अबादीत् / अबदीत्

	बद् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	बद् ल
तिप्तस्झिसिप्थस्थ ...	लस्य तिबादेशे, अनु० लोपे	बद् ति
इतश्च	इकार लोपे	बद् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अबद् त

च्लि लुङि	च्लि आगमे	अबद्च्लि त
च्लेः सिच्	च्लेः स्थाने सिजादेशः। अनु० लोपे	अबद्स्त
आर्धधातुकस्येड्वलादेः	इडागमे। अनु० लोपे	अबद्इस्त
अतो हलादेर्लघोः	विकल्पेन वृद्धि आदेशे	अबाद्इस्त
अस्तिसिचोऽपृक्ते	ईडागमे। अनु० लोपे	अबाद्इस्ईत
इट ईटि	सकार लोपे	अबाद्इईत
अकः सवर्णे दीर्घः	दीर्घादेशे	अबादीत् इतिसिद्धं
	वृद्धि अभाव पक्षे	अबदीतिति रूपं (१)

९७. गद्धातोः
९८. जगाद

	गद्धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	गद्ल्
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे।	गद्तिप्
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे। अनु०लोपे	गद्अ
लिटि धातोरनभ्यासस्य	द्वित्वे	गद्गद्अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	गगद
कुहोश्चुः	गकारस्य जकारे आदेशे	जगद
अत उपधायाः	वृद्धि आदेशे	जगादेतिसिद्धं।

९९. णद्धातोः
१००. नदति

	णद् धातोः	
णोनः	णकारस्य नकारे	नद्
वर्तमाने लट्	लट् लकारे अनु० लोपे	नद्ल्
तिप्तस्झिसिप्थस्थ...	तिबादेशे। अनु० लोपे	नद्ति
कर्तरि शप्	शबागमे। अनु० लोपे	नदति इतिसिद्धं।

१९. अर्दधातोः
१०१. आनर्द

	अर्द् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	अर्द्ल्

तिप्तस्झिसिप्थस्थ...	तिबादेशे।	अर्द्तिप्
परस्मैपदानांणलतुसुस्थ..	तिप् स्थाने णलादेशे।अनु०लोपे	अर्द्अ
लिटिधातोरनभ्यासस्य	द्वित्वे	अर्द्अर्द्अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदिहल शेषे अक्षरस्य शेषत्वे	अअर्द्अ
अत आदेः	अभ्यास दीर्घे	आअर्द्अ
तस्मान्नुड्द्विहलः	नुडागमे।अनु०लोपे	आन् अर्द्
	संयोगे	आनर्देतिसिद्धः।

१०२. आर्दीत

	अर्द्धातोः	
लुङ्	लुङ् लकारे।अनु०लोपे	अर्द्ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे।अनु०लोपे	अर्द्ति
इतश्च	इकार लोपे	अर्द्त्
आडजादीनाम्	आडागमे।अनु०लोपे	आअर्द्त्
आटश्च	वृद्धि एकादेशे (वृद्धौ)	आर्द्त्
च्लि लुङि	च्लि आगमे	आर्द्च्लित्
च्लेः सिच्	च्लेः स्थाने सिजादेशे।अनुलोपे	आर्द्स्त्
आर्धधातुकास्येड्वलादेः	इडागमे।अनु० लोपे	आर्द्इस्त्
अस्ति सिचोऽपृक्ते	ईडागमे।अनु० लोपे	आर्द्इस्ईत्
इट ईटि	सकार लोपे	आर्द्इईत्
अकः सवर्णे दीर्घः	दीर्घादेशे	आर्दीत् इतिसिद्धः

२०. टुनदि धातोः

१०३. नन्दति

	टुनदि धातोः	
आदिर्ञिटुडवः	'टु' इत्संज्ञायाम्	
तस्य लोपः	'टु' इति लोपे	नद्
इदितो नुम् धातोः	नुमागमे।अनु०लोपे	नन्द्
वर्तमाने लट्	लट् लकारे।अनु०लोपे	नन्द्ल
तिप्तस्झिसिप्थस्थ...	तिबादेशे	नन्द्ति

कर्तरि शप्	शबागमे। अनु० लोपे संयोगे	नन्द अति नन्दति इति सिद्धम्।

104. नन्द्यात्

	टुनदि धातोः	
आदिर्ञिटुडवः	इत्संज्ञायाम्	
तस्य लोपः	टु इति लोपे	नन्द्
इदितो नुम्धातोः	नुमागमे। अनु० लोपे	नन्द्
आशिषि लिङ्लोटौ	आ० लिङ् लकारे। अनु० लोपे	नन्द् ल
तिप्तस्झिसिप्थस्थ....	तिबादेशे। अनु० लोपे	नन्द् ति
इतश्च	इकार लोपे	नन्द् त
यासुट्परस्मैपदेषूदात्तो ङिच्च	यासुडागमे। अनु० लोपे	नन्द् यास् त
सुट्तिथोः	सुडागमे। अनु० लोपे	नन्द् यास् स् त
स्कोः संयोगाद्योरन्ते च	उभयो सकारलोपे	नन्द् यात = नन्द्यात् इति सिद्धम्।

उख धातोः
105. ओखति

	उख धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	उख ल
तिप्तस्झिसिप्थस्थ....	तिबादेशे। अनु० लोपे	उख ति
पुगन्तलघूपधस्य च	उपधा गुणे	ओख ति
कर्तरि शप्	शबागमे। अनु० लोपे	ओखतीति सिद्धम्।

106. उवोख

	उख धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	उख ल
तिप्तस्झिसिप्थस्थ	लस्य तिबादेशे। अनु० लोपे	उख ति
पुगन्तलघूपधस्य च	उपधा गुणे	ओख ति
परस्मैपदानां णलतुसुस्थल...	तिप्स्थाने णलादेशे। अनु० लोपे	ओख अ
लिटि धातोरनभ्यासस्य	द्वित्वे	ओख ओख अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादि शेषः	आदि हल् शेषे	ओ ओख अ

ह्रस्वः अभ्यासस्यासवर्णे	ह्रस्वे अङादेशे, अनुलोपे	उओरव उव् ओस् उवोस् इति सिद्धं।

91. मुच्लृ धातोः
108. अमुचत/अमुचीत

	मुच् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	मुच् ल
तिप्तस्झिसिप्थस्थ	लस्य तिबादेशे, अनु० लोपे	मुच् ति
इतश्च	इकार लोपे	मुच् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अमुच् त
च्लि लुङि	च्लि आगमे	अमुच् च्लि त
इरितो वा / लृदितः ...	विकल्पेन च्लि स्थाने अङ् आदेशे, अनुलोपे	अमुच् अ त
		अमुचत् इति सिद्धं (1)
	अभावपक्षे	अमुच् च्लि त्
च्लेः सिच्	च्लि स्थाने सिच्, अनुलोपे	अमुच् स त्
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	अमुच् इ स् त्
अस्तिसिचोऽपृक्ते	ईडागमे, अनु० लोपे	अमुच् इ स् ई त्
इट ईटि पुगन्तलघूपधस्य च	सकार लोपे	अमुच् इ ई त्
अकः सवर्णे दीर्घः	दीर्घादेशे / गुणे	अमुचीत् अमुचीत् इति सिद्धं (2)

92. अर्च् धातोः
108. आनर्च

	अर्च् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	अर्च् ल
तिप्तस्झिसिप् ...	लस्य तिबादेशे	अर्च् तिप्
परस्मैपदानां णलतुसुस्थ ...	तिप् स्थाने णलादेशे, अनुलोपे	अर्च् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	अर्च् अर्च् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	अ अर्च् अ
अत आदेः	अकारस्य दीर्घे	आ अर्च

तस्मान्नुड् द्विहलः	नुडागमे। अनुबन्धलोपे संयोगे	आन् अर्च आनर्चेति सिद्धः।

२४. अज् धातोः
११०. विवाय

	अज् धातोः	
परोक्षे लिट्	लिट् लकारे। अनुबन्धलोपे	अज् ल
तिप्तस्झिसिप्थस्थ..	लस्य तिबादेशे	अज् तिप्
परस्मैपदानां णलतु..	तिप् स्थाने णलादेशे, अनुबन्धलोपे	अज् अ
	आर्धधातुकसंज्ञायाम्	
लिट् च	अज् स्थाने वी आदेशे	वी अ
अजेर्व्यघञपोः	द्वित्वे	वी वी अ
लिटि धातोरनभ्यासस्य	पूर्वस्य अभ्यास संज्ञायाम्	
पूर्वोऽभ्यासः	ह्रस्वे	वि वी अ
ह्रस्वः	वृद्धि आदेशे	वि वै अ
अचो ञ्णिति	आयादेशे	वि व् आय् अ
एचोऽयवायावः	संयोगे	विवायेति सिद्धः।

१११. विव्यतुः

	अज् धातोः	
परोक्षे लिट्	लिट् लकारे। अनुबन्धलोपे	अज् ल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	वृत त
स्यतासीलृलुटोः	स्य आगमे	वृत स्य त
आर्धधातुकस्येड्वलादेः	इडागमे, अनु० लोपे	वृत इ स्य त
पुगन्तलघूपधस्य च	गुणे, रपरत्वे	वर्त इ स्य त
आदेश प्रत्यययोः	षत्वे	वर्तिष्यत
टित आत्मनेपदानां टेरे	टेरेत्वे	वर्तिष्यते इति सिद्धं।

कृपू धातोः

१०५. कल्पते

	कृप् धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	कृप् ल
तिप्तस्झिसिप्थस्थमिब्वस्मस्	लस्य तकारादेशे	कृप् त
पुगन्तलघूपधस्य च	गुणे, रपरत्वे	कर्प् त
कृपो रो लः	रेफः लकारे	कल्प् त
कर्तरि शप्	शबागमे, अनु० लोपे	कल्प् अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	कल्पते इति सिद्धं।

१०६. चक्लृपे

	कृप् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	कृप् ल
तिप्तस्झिसिप्थस्थमिब्वस्मस्	लस्य तकारादेशे	कृप् त
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे अनु० लोपे	कृप् ए
लिटि धातोरनभ्यासस्य	द्वित्वे	कृप् कृप् ए

पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
उरत्	अत् आदेशे, रपरत्वे	कर् कृप् ए
हलादिः शेषः	आदि हल् शेषे	कृप् ए
कुहोश्चुः	चर्त्वे	चकृप् ए
पुगन्तलघूपधस्य च	गुण प्राप्ते परं	
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
क्ङिति च	इत्यनेन सूत्रेण गुण निषिद्धेयाम्	चकृपे
कृपो रो लः	रेफसदृशस्य लकार सदृशे	चक्लृपे इति सिद्धः

२०१. चक्लृपिषे / चक्लृप्से

	कृप् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु॰लोपे	कृप् ल्
तिप्तस्झिसिप्थस्थ...	लस्य थासादेशे	कृप् थास्
थासस्से	थासस्य से आदेशे	कृप् से
लिटि धातोरनभ्यासस्य	द्वित्वे	कृप् कृप् से
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
उरत्	अत् आदेशे,	
उरण् रपरः	रपरत्वे	कर् कृप् से
हलादिः शेषः	आदि हल् शेषे	क कृप् से
कुहोश्चुः	ककारस्य चर्त्वेम्	च कृप् से
पुगन्तलघूपधस्य च	गुण प्राप्ते परं	
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
क्ङिति च	इत्यनेन सूत्रेण गुण निषिद्धेयाम्	चकृप्से
कृपो रो लः	रेफसदृशस्य लकार सदृशे	चक्लृप् से
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे, अनु॰लोपे	चक्लृपिसे
आदेशप्रत्यययोः	षत्वे	(१) चक्लृपिषे इति सिद्धः
	अभाव पक्षे	(२) चक्लृप्से इति सिद्धः

२०२. कल्पतासि

	कृप् धातोः	
अनद्यतने लुट्	लुट् लकारे, अनु॰लोपे	कृप् ल

~~तिप्तस्झिसिप्थस्थ...~~	~~लस्य थास् आदेशे~~	कृप् थास्
कृपो रो लः	रेफस्य रस्य लकार सदृशे	कृल्प् थास्
लुटि च क्लृपः	विकल्पेन परस्मैपद संज्ञायाम् थास् स्थाने सिबादेशे अनुबन्धलोपे	क्लृप् सि
लुटि च क्लृपः	विकल्पेन परस्मैपद संज्ञायाम्	कृप् ल
तिप्तस्झिसिप्थस्थ...	लस्य सिबादेशे, अनुबन्धलोपे	कृप् सि
स्यतासी लृलुटोः	तासागमे	कृप् तास् सि
तासस्त्योर्लोपः	सकार लोपे	कृप् तासि
स्वरतिसूतिसूयतिधूञूदितो वा	इडागम प्राप्ते	
	तत् निषिद्धायाम्	कृप् तासि
पुगन्तलघूपधस्य च	उपधा गुणे,	
उरण् रपरः	रपरत्वे	कर्प् तासि
कृपो रो लः	रेफस्य लकारे	कल्प् तासि इति सिद्ध (1)
	परस्मैपदसंज्ञायाम् अभावपक्षे	कृप् ल
तिप्तस्झिसिप्थस्थ...	लस्य थासादेशे	कृप् थास
थासः से	थासस्य से आदेशे	कृप् से
स्यतासी लृलुटोः	तासागमे	कृप् तास् से
तासस्त्योर्लोपः	सकार लोपे	कृप् तासे
पुगन्तलघूपधस्य च	उपधा गुणे	
उरण् रपरः	रपरत्वे	कर् प् तासे
कृपो रो लः	रेफस्य लकारे	कल्प् तासे
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे, अनुबन्धलोपे	कल्पितासे इति सिद्ध (2)
	अभाव पक्षे	कल्प्तासे इति सिद्ध (3)

४४. व्यथ् धातोः

४६. विव्यथे

व्यथ् धातोः

परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	व्यथ् ल
~~[illegible]~~	~~[illegible] संज्ञायाम्~~	
तिप्तस्झि...	लस्य ~~[illegible]~~ तकारादेशे	व्यथ् ~~[illegible]~~ त

परस्मैपदानां णलतुसुस्थलथुस... तिप्स्थाने थलादेशे अनुबन्धलोपे

लिटि धातोरनभ्यासस्य	द्वित्वे	
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	व्यथ् व्यथ् त
हलादिः शेषः	आदि हल शेषे, तत एवाह व	
व्यथो लिटि	सम्प्रसारणे	
सम्प्रसारणाच्च	पूर्वरूपे रूपम्	व् इ अ थ् व्यथ् त
हलादिः शेषः	आदि हल शेषे	व् इ थ् व्यथ् त
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे अनुबन्धलोपे	वि व्यथ् त
		विव्यथे इति सिद्धम्

५२. फण् धातोः

२१०. फेणतुः

फण् धातोः

परोक्षे लिट्	लिट् लकारे अनुबन्धलोपे	फण् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे तसादेशे	फण् तस्
परस्मैपदानां णलतुसुस्थलथुस...	तस् स्थाने अतुसादेशे, अनुबन्धलोपे	फण् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	फण् फण् अतुस्
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
फणां च सप्तानाम्	विकल्पे अभ्यास लोपे अकारस्य एकारे संयोगे	फेण् अतुस्
	सस्य रुत्व विसर्गौ	फेणतुस्
		फेणतुः इति सिद्धम्
	अभाव पक्षे	फण् फण् अतुस्
हलादिः शेषः	आदि हल शेषे	फफण् अतुस्
अभ्यासे	फकारस्य पकारे	पफणतुस्
	सस्य रुत्व विसर्गौ	पफणतुः इति

२११. फेणिथ

फण् धातोः

परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	फण् ल
तिप्तस्झिसिप्...	लस्य सिबादेशे	फण् सिप्

परस्मैपदानां णलतुसुस्थलथुसणलवमाः	सिप्स्थाने थलादेशे अनुबन्धलोपे	फण् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	फण्फण् थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
फणां च सप्तानाम्	विकल्पेन अभ्यासलोपे आकारस्य एकारे	फेण् थ
आर्धधातुकस्येड्वलादेः	इडागमे। अनुबन्धलोपे	फेणिथ इति सिद्धम् (१)
	एत्वाभ्यासलोप अभावपक्षे	फण्फेण् थ
	ह्रस्वः	फेणिथ इति
हलादिः शेषः	आदि हल शेषे	फफण् थ
अभ्यासे चर्च	चर्त्वे	पफण् थ
आर्धधातुकस्येड्वलादेः	इडागमे। अनुबन्धलोपे	पफणिथ इति रूपम्। (२)

षह् धातोः

४. परिषहते

४४.

	षह् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सह्
वर्तमाने लट्	लट् लकारे। अनुबन्धलोपे	सह् ल
तिप्तस्झिसिप्...	लस्य तकारादेशे	सह् त
कर्तरि शप्	शबागमे। अनुबन्धलोपे	सह् अत
टित आत्मनेपदानां टेरे	टेरेत्वे	सहते
	परि उपपदे	परि सहते
परिनिविभ्यः सेवसितसयसिवुसह-सुट्स्तुस्वञ्जाम्	सस्य षत्वे	परिषहते इति सिद्धम्।

४४३ सहिता

	षह् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सह्
अनद्यतने लुट्	लुट् लकारे अनुबन्धलोपे	सह् ल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	सह् त
स्यतासी लृलुटोः	तासागमे	सह् तास् त
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तकारस्य डा आदेशे। अनुबन्धलोपे	सह् तास् आ।

टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	
तीषसहलुभरुषरिषः	विकल्पेन इडागमे । अनु॰ लोपे	सह् त् आ
	संयोगे	सह् इत् आ
		(1) सहिता इति सिद्धम्
	इड् अभाव पक्षे	सह् ता
होढः	ढत्वे	सढ् ता
झषस्तथोर्धोऽधः	धत्वे	सढ् धा
ष्टुना ष्टुः	ष्टुत्वे	सढ् ढा
ढो ढे लोपः	ढकार लोपे	स ढा
सहिवहोरोदवर्णस्य	ओतादेशे । अनु॰ लोपे	सोढा
	परि उपपदे	परसोढा
परिनिविभ्यः सेवसितसयसिवुसहसुट्... सोढः	षत्वे प्राप्ते परं इत्यनेन सूत्रेण निषिद्धम्	(2) परसोढा इति सिद्धम्

५५. षद्लृ धातोः

२१४. सीदति

	षद् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सद्
वर्तमाने लट्	लट् लकारे । अनु॰ लोपे	सद् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे । अनु॰ लोपे	सद् ति
कर्तरि शप्	शबागमे । अनु॰ लोपे	सद् अ ति
पाघ्राध्मास्थाम्नादाणदृश्यर्तिसर्ति...	सद् स्थाने सीद् आदेशे	सीद् अ ति
	संयोगे	सीदतीति सिद्धम्।

२५. सेदिथ

	षद् धातोः	
धात्वादेः षः सः	षकारस्य सकारे	सद्
परोक्षे लिट्	लिट् लकारे । अनु॰ लोपे	सद् ल
तिप्तस्झि...	लस्य सिबादेशे	सद् सिप्
परस्मैपदानां णलतुसुस्थलथुस...	सिप् स्थाने थलादेशे । अनु॰ लोपे	सद् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	सद् सद् थ

ऋतो भारद्वाजस्य	इडागमो विकल्पेन, अनुबन्धलोप	सद् सद् इथ
थलि च सेटि	एत्व-अभ्यासलोपे	सेदिथ इति सिद्धं (1)
	इड् अभाव पक्षे	सद् सद् थ
हलादिः शेषः	आदि हल शेषे	ससद् थ
खरि च	चर्त्वे	ससत्थ इति रूपं (2)

२१५. निषसाद

षद् धातोः

परोक्षे लिट्	लिट्लकारे, अनुबन्धलोप	षद्ल
धात्वादेः षः सः	षकारस्य सकारे	सद्
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोप	सद्ल
तिप्तस्झि...	लस्य तिबादेशे	सद् तिप्
परस्मैपदानां णलतुसुस्थल..	तिप् स्थाने णलादेशे, अनुबन्धलोपे	सद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	सद् सद् अ
हलादिः शेषः	आदि हल शेषे	ससद् अ
अत उपधायाः	उपधा वृद्धौ	ससाद
	नि उपपदे	निससाद
सदिरप्रतेः	षत्वे	निषसाद
स्थादिष्वभ्यासेन चाभ्यासस्य	सकारस्य षत्वे प्राप्ते परं	
सदेः परस्य लिटि	इति निषिद्धियाम्	निषसाद इति सिद्धं।

शद्लृ धातोः

२१६. शीयते

२१७.

शद् धातोः

वर्तमाने लट्	लट् लकारे, अनुबन्धलोपे	शद्ल
तिप्तस्झिसिप्	तिबादेशे प्राप्ते परं	
शदेः शितः	इत्यनेन सूत्रेण आत्मनेपदसंज्ञायाम्	
	अतः तकारादेशे	शद् त
कर्तरि शप्	शबागमे, अनु० लोपे	शद् अ त
पाघ्राध्मास्थाम्नादाण्दृश्यर्ति	शद् स्थाने शीय आदेशे	शीय् अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	शीयते इति सि

२१८. शेदतुः

	शद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	शद् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे तसादेशः	शद् तस्
परस्मैपदानां णलतुसुस्थल...	तस् स्थाने अतुसादेशे	शद् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	शद् शद् अतुस्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
अत एकहल्मध्येऽनादेशादेर्लिटि	अभ्यासलोपे अकारस्य एकारे	शेदतुस्
	सस्य रुत्व विसर्गौ	शेदतुः इति सिद्धम्

५७. खनु धातोः

२१९. चखनतुः

	खन् धातोः	
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	खन् ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	खन् तस्
परस्मैपदानां णलतुसुस्थल,	तस् स्थाने अतुसादेशे	खन् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	खन् खन् अतुस्
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम्	
हलादि कुहोश्चुः	खकारस्य छकारे	
हलादिः शेषः	आदिहल शेषे	खखनअतुस्
कुहोश्चुः	खकारस्य छकारे	छखनतुस्
अभ्यासे चर्च	चर्त्वे	चखनतुस्
	सस्य रुत्व विसर्गौ	चखनतुः
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
गमहनजनखनघसां लोपः क्ङित्यनङि	उपधा लोपे	चख्नतुः इति

२२०. खायात् / खन्यात्

	खन् धातोः	
आशिषि लिङ्लोटौ	लिङ् लकारे अनुबन्धलोपे	खन् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	खन् ति

इतश्च	इकार लोपे	खन त
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे। अनु०लोपे	खन यास त
सुट् तिथोः	सुडागमे। अनु०लोपे	खन यास स त
स्कोः संयोगाद्योरन्ते च	उभयोः सकार लोपे	खन या त
किदाशिषि	कित् संज्ञायाम	
ये विभाषा	विकल्पेन आत्वे	खायात् इति सिद्धं (1)
	अभाव पक्षे	खन्यात् इति रूपं (2)

२२०. गुहू धातोः
गूहति/गूहते

२२१.

	गुहू धातोः	
वर्तमाने लट्	लट् लकारे, अनु०लोपे	गुह् ल
तिप्तस्झिसिप्थस्थ...	लस्यतिबादेशे। अनु०लोपे	गुह् ति
कर्तरि शप्	शबागमे, अनु०लोपे	गुह् अ ति
पुगन्तलघूपधस्य च	गुणे प्राप्ते परं तत् प्रबाध्य	
ऊदुपधाया गोहः	उपधा दीर्घे	गूहति इति सिद्धं (1)
	आत्मनेपदे तकारादेशे	गूह त
टित आत्मनेपदानां टेरे	टेरेत्वे	गूहते इति रूपं (2)

गोढा

२२२.

	गुहू धातोः	
अनद्यतने लुट्	लुट् लकारे। अनु०लोपे	गुह् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे / तकारादेशे	गुह् तिप्/त
स्यतासी लृलुटोः	तासागमे	गुह् तास तिप्/त
आर्धधातुकं शेषः	आर्धधातुकसंज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप्/त स्थाने डा आदेशे। अनु०लोपे	गुह् तास आ
टेः	डित्व सामर्थ्याद् अभस्यापि टेर्लोपः	गुह् त आ
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे। अनु०लोपे	गुहिता
ऊदुपधाया गोहः	उपधा दीर्घे	गूहिता (1) इति सिद्धं
	इट् अभाव पक्षे	गुह् ता
होढः	ढत्वे	गुढ ता

पुगन्तलघूपधस्य च	गुणे	
झषस्तथोर्धोऽधः	तकारस्य धकारे	गोढ्ता
ष्टुना ष्टुः	ष्टुत्वे	गोढ्धा
ढो ढे लोपः	ढकार लोपे	गोढ्ढा
		गोढा इति रूपम्

223. गूहिष्यति / घोक्ष्यति

	गुह् धातोः	
लृट् शेषे च	लृट्लकारे, अनु० लोपे	
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनु० लोपे	गुह् ल
स्यतासी लृलुटोः	स्य आगमे	गुह् ति
आर्धधातुकस्येड्वलादेः	[illegible]	गुह् स्यति
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
स्वरतिसूतिसूयतिधूञूदितो वा	विकल्पेन इडागमे, अनु० लोपे	गुहिस्यति
आदेशप्रत्यययोः	षत्वे	गुहिष्यति
ऊदुपधाया गोहः	ऊकारस्य दीर्घे	गूहिष्यतीति
	इट् अभाव पक्षे	गुह्स्यति
हो ढः	ढत्वे	गुढ्स्यति
एकाचो बशो भष् झषन्तस्य स्ध्वोः	भष्भावे	घुढ्स्यति
षढोः कः सि	कत्वे	घुक्स्यति
आदेशप्रत्यययोः	षत्वे	घुक्ष्यति
	(क्ष = क् ष्) संयोगे	घुक्ष्यति
पुगन्तलघूपधस्य च	उपधा गुणे	घोक्ष्यतीति रूपम्

224. अगूहीत / अघुक्षत

	गुह् धातो (उभयपदी)	
लुङ्	लुङ् लकारे, अनु० लोपे	गुह् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे, अनु० लोपे	गुह् ति
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अ गुह् ति
इतश्च	इकार लोपे	अगुह् त्
च्लि लुङि	च्लि आगमे	अगुह् च्लि त्

च्लेः सिच्	च्लि स्थाने सिजादेशे, अनु० लोपे	अगुह् स त
स्वरति सूति सूयति धूञूदितो वा	विकल्पेन इडागमे, अनु० लोपे	अगुह् इ स त
ऊदुपधाया गोहः	उकारस्य दीर्घे	अगूह् इ स त
अस्तिसिचोऽपृक्ते	ईडागमे, अनु० लोपे	अगूह् इ स ईत
इट ईटि	सकार लोपे	अगूह् इ ईत
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	अगूहीत इति सिद्धं ①
	इड् अभाव पक्षे	अगुह् च्लि त
शल इगुपधादनिटः क्सः	क्स आदेशे, अनु० लोपे	अगुह् स त
हो ढः	ढत्वे	अगुढ् स त
एकाचो बशो भष् झषन्तस्य स्ध्वोः	भष्भावे	अघुढ् स त
षढोः कः सि	कत्वे	अघुक् स त
आदेश प्रत्यययोः	षत्वे	अघुक् ष् त
	संयोग (क्ष् = क्ष)	अघुक्षत इति रूपं ②

११४. अगूढ / अघुक्षत

	गुह् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	गुह् ल
तिप्तस्झिसिप्थस्थ	लस्य तकारादेशे	गुह् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अगुह् त
च्लि लुङि	च्लि लुङि	अगुह् च्लि त
शल इगुपधादनिटः क्सः	च्लि स्थाने क्स आदेशे, अनु० लोपे	अगुह् स त
लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये	विकल्पेन क्स लोपे	अगुह् त
हो ढः	ढत्वे	अगुढ् त
झषस्तथोर्धोऽधः	तकारस्य धकारे	अगुढ् ध
ष्टुना ष्टुः	ष्टुत्वे	अगुढ् ढ
ढो ढे लोपः	ढकार लोपे	अगुढ
ऊदुपधाया गोहः	दीर्घे	अगूढ इति सिद्धं १
	क्स लोप अभावे	अगुह् स त
हो ढः	ढत्वे	अगुढ् स त

एकाचोबशोभष्झषन्तस्य स्ध्वोः	भष् भावे	
षढोः कः सि	कत्वे	अघुढ्सत
आदेश प्रत्यययोः	षत्वे	अघुक्सत
	(क्ष् = क्ष) संयोगे	अघुक्षत
		अघुक्षत इति रूपं

२२५. अघुक्षावहि / अघुक्षावहि

२८. भृञ् धातोः

भ्रियात्

२२६.

	भृञ् धातोः	
आशिषि लिङ्लोटौ	आ० लिङ् लकारे। अनु० लोप	
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे। अनु० लोपे	भृ ल
इतश्च	इकार लोपे	भृ ति
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे। अनु० लोपे	भृ त
सुट् तिथोः	सुडागमे। अनु० लोपे	भृ यास त
स्कोः संयोगाद्योरन्ते च	उभयोः सकार लोपे	भृ यास्स्त
क्ङिति च / लिङाशिषि	आर्धधातुकसंज्ञायाम्	भृ यात्
रिङ् शयग्लिङ्क्षु	ऋतो रिङादेशे। अनु० लोपे संयोगे	भ्रियात्
		भ्रियात् इति सिद्धं

२२७. अभार्षीत्

	भृञ् धातोः उभयपदी	
लुङ्	लुङ् लकारे। अनु० लोपे	भृ ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे। अनु० लोपे	भृ ति
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अभृ ति
इतश्च	इकार लोपे	अभृ त
च्लि लुङि	च्लि आगमे	अभृ च्लि त
च्लेः सिच्	च्लि स्थाने सिच्। अनु० लोपे	अभृ स त
सिचि वृद्धिः परस्मैपदेषु	वृद्धौ। रपरत्वम्	अभार् स त
अस्तिसिचोऽपृक्ते	ईडागमे। अनु० लोपे	अभार् सीत्
	षत्वे	अभार्षीत् इति सि[द्धं]

128. अभूत

	भू	
लुङ्	लुङ् लकारे, अनु० लोपे	भूल्
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	भूत
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अभूत
च्लि लुङि	च्लि आगमे	अभूच्लित
च्लेः सिच्	च्लि स्थाने सिजादेशे, अनु० लोपे	अभूसत
सार्वधातुकार्धधातुकयोः	गुणे प्राप्ते, परं	
उश्च	कित् संज्ञायाम्	
क्ङिति च	इत्यनेन सूत्रेण गुण निषेधे	अभूसत
ह्रस्वादङ्गात्	सकारलोपे	अभूत इति सिद्धम्।

धेट् धातोः

129. दधौ

	धेट् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	धेल्
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे	धे तिप्
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे, अनु० लोपे	धे अ
आदेच उपदेशेऽशिति	आ आत्वे	धा अ
आत औ णलः	औकारादेशे	धा औ
लिटि धातोरनभ्यासस्य	द्वित्वे	धाधा औ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
ह्रस्वः	ह्रस्वे	धधा औ
अभ्यासे चर्च	जश्त्वे	दधा औ
वृद्धिरेचि	वृद्धौ	दधौ इति सिद्धम्

130. दधतुः

	धेट् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	धेल्

तिप्तस्झिसिप...	लस्य तिबादेशाद् तसादेशे	
परस्मैपदानां णलतुसुस्	तस् स्थाने अतुसादेश	धे तस
आदेच उपदेशेऽशिति	आकारान्तादेश	धे अतुस
लिटि धातोरनभ्यासस्य	द्वित्वे	धा अतुस
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम	धाधा अतुस
ह्रस्वः	ह्रस्वे	
अभ्यासे चर्च	धकारस्य दकारे	धधा अतुस
असंयोगाल्लिट् कित	कित संज्ञायाम	दधा अतुस
आतो लोप इटि च	आकारस्य लोपे	
	संयुक्ते	दध् अतुस
	सस्य रुत्वविसर्गौ	दधतुस
		दधतुः इति सिद्धं

२३१. दधिथ/दधाथ

	धेट् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोप	धेल
तिप्तस्झिसिप...	लस्य सिबादेशे	धे सिप
परस्मैपदानां णलतुसुस्थलथ...	सिप् स्थाने थलादेश, अनु० लोप	धे थ
आदेच उपदेशेऽशिति	आकारान्तादेशे	धा थ
लिटि धातोरनभ्यासस्य	द्वित्वे	धाधा थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम	
ह्रस्वः	ह्रस्वे	धधाथ
अभ्यासे चर्च	जश्त्वे	दधाथ
ऋतो भारद्वाजस्य	विकल्पेन इडागमे, अनु० लोप	दधा इथ
आतो लोप इटि च	आकारस्य लोपे	दध् इथ
	संयुक्ते	दधिथ इति सिद्धं
	इड् अभाव पक्षे	दधाथ इति रूपं

२३२ दधिव

	धेट् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोप	धेल

तिप्तस्झिसिप्थस्थमिब्...	लस्य वसादेशे	धे वस
परस्मैपदानां णलतुसुस्...	वस स्थाने वकार आदेशे	धे व
आदेच उपदेशेऽशिति	आकारान्तादेशे	धाव
लिटि धातोरनभ्यासस्य	द्वित्वे	धाधाव
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
ह्रस्वः	ह्रस्वे	धधाव
अभ्यासे चर्च	जश्त्वे	दधाव
कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि	इडागमे, अनुबन्धलोपे	दधा इव
आतो लोप इटि च	आकार लोपे	दध् इव
	संयुक्ते	दधिव इति सिद्धम्।

233. धेयात्

धेट् धातोः

परोक्षे लिट्	लिङ् लकारे, अनुबन्धलोपे	धे ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	धे ति
इतश्च	इकारलोपे	धे त्
आदेच उपदेशेऽशिति	आकारान्तादेशे	धात्
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनुबन्धलोपे	धायास्त्
सुट् तिथोः	सुडागमे, अनुबन्धलोपे	धायास्स्त्
स्कोः संयोगाद्योरन्ते च	उभयोः सकारलोपे	धायात्
दाधाघ्वदाप्	घु संज्ञायाम्	
किदाशिषि	कित् संज्ञायाम्	
लिङाशिषि	आर्धधातुक संज्ञायाम्	
एर्लिङि	अकारस्य एकारे	धेयात् इति सिद्धम्।

234. अदधात्

धेट् धातोः

लुङ्	लुङ् लकारे, अनुबन्धलोपे	धे ल
तिप्तस्झिसिप्थस्थमिब्...	लस्य तिबादेशे, अनुबन्धलोपे	धे ति
इतश्च	इकार लोपे	धे त्

लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	अधेत
च्लि लुङि	च्लि आगमे	अधेच्लित
विभाषा धेट्श्व्योः	विकल्पेन च्लि स्थाने चङ् आदेशे, अनुबन्धलोपे	अधेअत
आदेच उपदेशेऽशिति	आकारान्तादेश	अधाअत
चङि	द्वित्वे	अधाधाअत
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
ह्रस्वः	ह्रस्वे	अधधाअत
अभ्यासे चर्च	जश्त्वे	अदधाअत
आतो लोप इटि च	आकार लोपे	अदधअत
	संयुक्ते	अदधत इति सिद्धम् (1)
	चङ् अभाव पक्षे	अधेच्लित
च्लेः सिच्	च्लि स्थाने सिच्, अनु० लोपे	अधेस् त
आदेच उपदेशेऽशिति	आत्वे	अधास् त
गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु	सिच् लोपे प्राप्ते नित्यं, पर	
विभाषाघ्राधेट्शाच्छासः	इत्यनेन सूत्रेण विकल्पेन सकारलोपे	अधात इति सि(2)
	सिच् लोप अभाव पक्षे	अधास् त
यमरमनमातां सक् च	सकागमे च सिच् इडागमे, अनुबन्धलोपे	अधास् इ स त
अस्ति सिचोऽपृक्ते	ईडागमे, अनु० लोपे	अधास् इ स ईत
इट ईटि	इति सस्लोपे	अधास् इ ईत
अकः सवर्णे दीर्घः	सवर्णे दीर्घे	अधासीत इति (3)

अधुः

234.

धेट् धातोः

लुङ्	लुङ् लकारे, अनुबन्धलोपे	धेल्
तिप्तस्झिसिप्थस्थ...	लस्य झि आदेश	धेझि
च्लि लुङि	च्लि आगम	धेच्लिझि
~~च्लेः सिच्~~	~~च्लि स्थाने सिजादेशः~~	
विभाषा धेट्श्व्योः	विकल्पेन च्लि स्थाने चङ्, अनु० लोपे	धेअझि
आदेच उपदेशेऽशिति	आत्वे	धाअझि

	द्वित्वे	धा धा अ मि
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम	
ह्रस्वः	ह्रस्वे	धा धा अ मि
अभ्यासे चर्च	जशत्वे	दधा अ मि
आतो लोप इटि च	आकार लोपे	दध् अ मि
झोऽन्तः	झस्य अन्त आदेशे	दध् अ अन्त
अतो गुणे	पररूपे	दधन्त
संयोगान्तस्य लोपः	तकार लोपे	दधन्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अदधान् इति सिद्धं। (१)
	चङ् अभाव पक्षे	धे च्लि मि
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अधे च्लि मि
च्लेः सिच्	सिजादेशे, अनु० लोपे	अधे स् मि
आदेच उपदेशेऽशिति	आत्वे	अधा स् मि
सिजभ्यस्तविदिभ्यश्च	झिस्थाने जुस् आदेशे, अनु० लोपे	अधा स् उस्
विभाषा घ्राधेट्शाच्छासः	विकल्पेन सकार लोपे	अधा उस्
उस्यपदान्तात्	पररूपे	अधुस्
	सस्य रुत्व विसर्गे	अधुः इति रूपं (१)
	सकार लोप अभाव पक्षे	अधा स् उस्
यमरमनमातां सक् च	सक् आगमे सिच चङ् इडागमे, अनु० लोपे	अधा स् इस् उस्
आदेश प्रत्ययोः	षत्वे, संयुक्ते	अधासिषुस्
	सस्य रुत्व विसर्गे	अधासिषुः इति रूपं (२)

६१ ग्लैधातोः

२३६. ग्लायति

	ग्लै धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	ग्लै ल
तिप्तस्झि…	लस्य तिबादेशे, अनु० लोपे	ग्लै ति
कर्तरि शप्	शबागमे, अनु० लोपे	ग्लै अ ति
एचोऽयवायावः	आयादेशे	ग्लायतीति सिद्धं।

६२. ह्वृ धातोः

९३. जह्वार

	ह्वृ धातोः	
परोक्षे लिट्	लिट् लकारे, अनुबन्धलोपे	ह्वृ ल
तिप्तस्झिसिप् ...	लस्य तिबादेशे,	ह्वृ तिप्
परस्मैपदानां णलतुसुस्थल	तिप् स्थाने णलादेशे, अनुबन्धलोपे	ह्वृ अ
अचो ञ्णिति	वृद्धि प्राप्ते परं	
ऋतश्च संयोगादेर्गुणः	इत्यनेन सूत्रेण गुणे, रपरत्वे	ह्व अर् अ
[struck]	संयुक्ते	ह्वर् अ
अत उपधायाः	वृद्धौ	ह्वृ
लिटि धातोरनभ्यासस्य	द्वित्वे	ह्वर् ह्वर् अ
हलादिः शेषः	आदि हल शेषे	ह ह्वर् अ
कुहोश्चुः	चवर्गे	जह्वर् अ
अत उपधायाः	उपधा वृद्धौ	जह्वार् अ
	संयुक्ते	जह्वार इति सिद्धं।

९३. जह्वरतुः

	ह्वृ धातोः	
परोक्षे लिट्	लिट् लकारे	ह्वृ ल
तिप्तस्झि ...	लस्य तसादेशे	ह्वृ तस्
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः	तस् स्थाने अतुसादेशे	ह्वृ अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	ह्वृ ह्वृ अतुस्
उरत्	अत् आदेशे	
उरण् रपरः	रपरत्वे	ह्वर् ह्वृ अतुस्
हलादिः शेषः	आदि हल शेषे	ह ह्वृ अतुस्
कुहोश्चुः	चवर्गे	जह्वृ अतुस्
सार्वधातुकार्धधातुकयोः	गुण प्राप्ते परं	
असंयोगाल्लिट् कित् क्ङिति च	कित् संज्ञायाम् इत्यनेन गुण निषिद्धयाम्	जह्वृ अतुस्
ऋतश्च संयोगादेर्गुणः	तत्प्रबाधय गुणादेशे, रपरत्वे	जह्वर् अतुस्
	संयुक्ते	जह्वरतुस्

	सस्य रुत्व विसर्गो	आह्वरतुः इति सिद्धिः

ऋ धातोः
आर

	ऋ धातोः	
परोक्षे लिट्	लिट् लकारे। अनुबन्धलोपे	ऋ ल
तिप्तस्झिसिप्...	लस्य तिबादेशे	ऋ तिप्
परस्मैपदानां णलतुसुस्थलथुस...	तिप् स्थाने णलादेशे। अनुलोपे	ऋ अ
लिटि धातोरनभ्यासस्य	द्वित्वे	ऋ ऋ अ
उरत्	ऋवर्णस्य अत् आदेशे	
उरण्रपरः	रपरत्वे	अर् ऋ अ
हलादिः शेषः	~~अभ्यासस्य~~ रेफलोपे	अ ऋ अ
अत आदेः	दीर्घे	आ ऋ अ
ऋच्छत्यृताम्	गुणे। रपरत्वे	आ अर् अ
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	आर इति सिद्धिः।

आरतुः

	ऋ धातोः	
परोक्षे लिट्	लिट् लकारे। अनुलोपे	ऋ ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	ऋ तस्
परस्मैपदानां णलतुसुस्थलथुसणलवमाः	तस् स्थाने अतुसादेशे	ऋ अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	ऋ ऋ अतुस्
उरत्	~~अत आदेः~~ अत् आदेशे	
उरण्रपरः	रपरत्वे	अर् ऋ अतुस्
हलादिः शेषः	रेफ लोपे	अ ऋ अतुस्
~~इडत्यर्तिव्ययतीनाम्~~ ऋच्छत्यृताम्	गुणे	अ अर् अतुस्
अत आदेः	दीर्घे	आ अरतुस्
अकः सवर्णे दीर्घः	दीर्घस्यादेशे	आरतुस्
	सस्य रुत्व विसर्गो	आरतुः इति रूपं।

६४ श्रु धातोः

२४१. शृणोति

	श्रु धातोः	
वर्तमाने लट्	लट् लकारे, अनुबन्धलोपे	श्रु ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	श्रु ति
श्रुवः शृ च	श्रु स्थाने शृ आदेशे च श्नु आगमे, अनुबन्धलोपे	शृ नु ति
	नकारस्य णकारे	शृ णु ति
सार्वधातुकार्धधातुकयोः	गुणे	शृणोति इति सिद्धम्

२४२. शृणवानि

	श्रु धातोः	
लोट् च	लोट् लकारे, अनुबन्धलोपे	श्रु ल
तिप्तस्झिसिप्थस्थ...	लस्य मिबादेशे, अनुबन्धलोपे	श्रु मि
~~कर्तरि शप्~~	~~शबागमे अनुबन्धलोपे~~	~~श्रु~~
श्रुवः शृ च	श्रु स्थाने शृ आदेशे च श्नु आगमे, अनुबन्धलोपे	शृ नु मि
मेर्निः	मि स्थाने नि आदेशे	शृ नु नि
आडुत्तमस्य पिच्च	आडागमे, अनुबन्धलोपे	शृ नु आनि
सार्वधातुकार्धधातुकयोः	गुणे	शृ नो आनि
	णत्वे	शृ णो आनि
एचोऽयवायावः	अवादेशे	शृणवानि इति सिद्धम्

२४३. अश्रौषीत्

	श्रु धातोः	
लुङ्	लुङ् लकारे, अनुबन्धलोपे	श्रु ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	श्रु ति
इतश्च	इकार लोपे	श्रु त्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	अश्रु त्
च्लि लुङि	च्लि आगमे	अश्रु च्लि त्
च्लेः सिच्	च्लि स्थाने सिजादेशे, अनुबन्धलोपे	अश्रु स् त्
सिचि वृद्धिः परस्मैपदेषु	वृद्धि आदेशे	अश्रौ स् त्

आर्धधातुकस्येड्वलादेः	इड्प्राप्तेपर	
श्र्युकः किति / स्तुद्रुस्रुश्रुवो लिटि	इत्यनेन इडनिषिद्धियाम्	अश्रौस त
अस्तिसिचोऽपृक्ते	ईडागमे, अनु० लोपे	अश्रौसीत इति सिद्धम्।

देङ् धातोः

४४. दयते

	देङ् धातोः	
वर्तमानेलट्	लट् लकारे, अनु० लोपे	देल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	दे त
कर्तरिशप्	शबागमे, अनु० लोपे	दे अ त
एचोऽयवायावः	अयादेशे	दय् अ त
टित आत्मनेपदानां टेरे	टेरेत्वे	दयते इति सिद्धम्।

४५. दिग्ये

	देङ् धातोः	
परोक्षेलिट्	लिट् लकारे, अनु० लोपे	देल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	दे त
दयतेर्दिगि लिटि	दिगि आदेशे, द्वित्व च बाधते	दिगि त
लिटस्तझयोरेशिरेच्	एशादेशे, अनु० लोपे	दिगि ए
इको यणचि	यणि	दिग्ये इति सिद्धम्।

४६. अदित

	देङ् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	देल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	दे त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अ दे त
च्लि लुङि	च्लि आगमे	अ दे च्लि त
च्लेः सिच्	च्लिस्थाने सिजादेशे, अनु० लोपे	अ दे स् त
स्थाध्वोरिच्च	इकारादेशे सिच्च कित संज्ञायाम्	अदिस् त
ह्रस्वादङ्गात्	सकार लोपे	अदित इति सिद्धम्
सार्वधातुकार्धधातुकयोः	गुण प्राप्ते परं	
क्ङिति च	इत्यनेन गुण निषेधे	अदित इति सिद्धम्।

६६। तॄधातोः
२४७. तेरतुः

परोक्षेलिट्	तॄ धातोः लिट् लकारे। अनुब्लोपे	
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	तॄ ल
परस्मैपदानां णलतुसुस्थलथुस्	तस स्थाने अतुसादेशे	तॄ तस
लिटि धातोरनभ्यासस्य	द्वित्वे	तॄ अतुस
तॄफलभजत्रपश्च	अकारस्य एकारे च अभ्यास लोपे	तॄ तॄ अतुस
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
इको यणचि	इक् स्थाने यणि	
ऋच्छत्यॄताम्	गुणादेशे। रपरत्वे	तॄ तर् अतुस्
तॄफलभजत्रपश्च	अकार एकारे च अभ्यास लोपे	तेर् अतुस्
	संयुक्ते	तेरतुस्
	ससजुषो रुः विसर्गे	तेरतुः इति सिद्धं।

२४८. तरीता / तरिता

	तॄ धातोः	
अनद्यतने लुट्	लुट् लकारे। अनुब्लोपे	तॄ ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे।	तॄ तिप्
स्यतासी लृलुटोः	तासागमे	तॄ तास तिप्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे। अनुब्लोपे	तॄ तास् आ
टेः	डित्व सामर्थ्याद् अभस्यापि टेर्लोपः	तॄ त् आ
आर्धधातुकस्येड्वलादेः	इडागमे। अनुब्लोपे	तॄ इता
सार्वधातुकार्धधातुकयोः	गुणे। रपरत्वे	तर् इता
वॄतो वा	विकल्पेन इट् दीर्घे	तरीता इति सिद्धं।
	अभावपक्षे	तरिता इति रूपं।

२४९. तीर्यात्

	तॄ धातोः	
आशिषि लिङ्लोटौ	आ०लिङ् लकारे। अनुब्लोपे	तॄ ल

तिप्तस्झिसिप् . . .	लस्य तिबादेशे । अनु० लोपे	तृति
इतश्च	इकार लोपे	तृत
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनु० लोपे	तृयासत
सुट् तिथोः	सुडागमे । अनु० लोपे	तृयास्सत
स्कोः संयोगाद्योरन्ते च	उभयोः सकारलोपे	तृयात
ऋत इद्धातोः	ऋदन्तस्य इतादेशे	
उरण् रपरः	रपरत्वे	तिर्यात
हलि च	दीर्घे	तीर्यात इतिसिद्धं

अतारिष्टाम्

१०.

	तॄ धातोः	
लुङ्	लुङ् लकारे अनु० लोपे	तृल
तिप्तस्झिसिप्थस्थमिब्वस् .	लस्य तसादेशे	तृ तस्
तस्थस्थमिपां तांतंतामः	तस् स्थाने ताम् आदेशे	तृ ताम्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे । अनु० लोपे	अ तृ ताम्
च्लि लुङि	च्लि आगमे	अ तृ च्लि ताम्
च्लेः सिच्	च्लिस्थाने सिच् । अनु० लोपे	अतृस् ताम्
सिचि वृद्धिः परस्मैपदेषु	वृद्धौ । रपरत्वे	अत आर् स् ताम्
आर्धधातुकस्येड् वलादेः	इडागमे । अनु० लोपे	अतारिस्ताम्
वॄतो वा	दीर्घे प्राप्ते परं	
सिचि च परस्मैपदेषु	इत्यनेन सूत्रेण दीर्घ निषेधे	अतारिस्ताम्
आदेश प्रत्यययोः	षत्वे	अतारिष्ताम्
ष्टुना ष्टुः	ष्टुत्वे	अतारिष्टामिति सिद्धं ।

१७. गम्लृ धातोः

५१. गच्छति

	गम् धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	गम् ल
तिप्तस्झिसिप्थस्थ . .	लस्य तिबादेशे, अनु० लोपे	गम् ति
कर्तरि शप्	शबागमे, अनु० लोपे	गम् अति

इषुगमियमां छः	छकार आदेशे	
छे च	तुगागमे, अनु० लोपे	गछ् अति
[illegible]	[illegible]	गत् छ् अति
स्तोः श्चुना श्चुः	श्चुत्वे	[illegible]
खरि च	चर्त्वे	गच्छति इति सिद्धम्

222. जग्मतुः

	गम् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	गम् ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	गम् तस्
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः	तस् स्थाने अतुसादेशे	गम् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	गम् गम् अतुस्
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम्	
हलादि शेषः	आदि हल शेषे	ग गम् अतुस्
कुहोश्चुः	चर्त्वे	जगम् अतुस्
गमहनजनखनघसां लोपः क्ङित्यनङि	उपधालोपे	जग्म् अतुस्
	सस्य रुत्व विसर्गे	जग्मतुः इति सिद्धम्

222. जगमिथ/जगन्थ

	गम् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	गम् ल
तिप्तस्झिसिप्थस्थ...	लस्य सिबादेशे, अनु०	गम् सिप्
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः	सिप् स्थाने थलादेशे, अनु० लोपे	गम् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	गम् गम् थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्याससंज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	ग गम् थ
कुहोश्चुः	चर्त्वे	जगम् थ
ऋतो भारद्वाजस्य	विकल्पेन इडागमे	जगमिथ इति सिद्धम्
	अभाव पक्षे	जगम् थ
नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	जगंथ

अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे नकारे	गन्ता इति रूपं

गन्ता

५५४.

	गम् धातोः	
अनद्यतने लुट्	लुट् लकारे। अनु० लोपे	गम् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे	गम् तिप्
स्यतासी लृलुटोः	तासागमे	गम् तास् तिप्
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे। अनु० लोपे	गम् तास् डा
टेः	डित्वसामर्थ्यात् अभस्यापि टेर्लोपः	गम् ता
आर्धधातुकस्येड् वलादेः	इडागमे। अनु० लोपे प्राप्ते	
एकाच उपदेशेऽनुदात्तात्	इत्यनेन सूत्रेण निषेधे	गम्ता
मोऽनुस्वारः / नश्चापदान्तस्य झलि	मकारस्य अनुस्वारे	गंता
अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे	गन्ता इति सिद्धम्

गमिष्यति

५५५.

	गम् धातोः	
लृट् शेषे च	लृट् लकारे। अनु० लोपे	गम् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे	गम् ति
स्यतासी लृलुटोः	स्य आगमे	गम् स्यति
~~आर्धधातुकस्येड्~~		
गमेरिट् परस्मैपदेषु	इडागमे। अनु० लोपे	गमिस्यति
आदेशप्रत्यययोः	षत्वे	गमिष्यतीति सिद्धम्

अगमत्

५५६.

	गम् धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	गम् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे। अनु० लोपे	गम् ति
इतश्च	इकार लोपे	गम् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अगम् त
च्लि लुङि	च्लि आगमे	अगम् च्लि त
पुषादिद्युताद्यॢदितः परस्मैपदेषु	च्लि स्थाने च्लादेशे। अनु० लोपे	अगम् अ त
	संयुक्ते	अगमतीति / अगमत् इति सिद्धम्

६८. सृप्लृ धातोः

२५७. ससर्प

	सृप् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	सृप् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे	सृप् तिप्
परस्मैपदानां णलतुसुस्थलथुसण...	तिप् स्थाने णलादेशे। अनु० लोपे	सृप् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	सृप्सृप् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
उरत्	अत् आदेशे	
उरण् रपरः	रपरत्वे	सर्प्सृप् अ
हलादिः शेषः	आदि हल शेषे	ससृप् अ
पुगन्तलघूपधस्य च	उपधा गुणे	ससर्प इति रूपम्

२५८. सृप्ता / सर्प्ता

	सृप् धातोः	
अनद्यतने लुट्	लुट् लकारे। अनु० लोपे	सृप् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे	सृप् तिप्
स्यतासी लृलुटोः	तासागमे	सृप् तास् तिप्
आर्धधातुकं शेषः	आर्धधातुक संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे। अनु० लोपे	सृप् तास् आ
टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	सृप् त् आ
अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्	विकल्पेन अम् आगमे। अनु० लोपे	सृ अ प्ता
इको यणचि	यण् रूप रेफ आदेशे	सृ र अप्ता
	संयुक्ते	स्रप्ता इति
	अम् आगम अभाव पक्षे	सृप् ता
पुगन्तलघूपधस्य च	गुणे	सर्प्ता इति रूपम्

६९. दृशिर् धातोः

२५९. पश्यति

	दृश् धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	दृश् ल

तिप्तस्झि...	लस्य तिबादेशे, अनु० लोपे	दृश् ति
कर्तरि शप्	शबागमे, अनु० लोपे	दृश् अति
पाघ्राध्मास्थाम्नादाण्...	दृश् स्थाने पश्य आदेशे	पश्य अति
अतो गुणे	पररूप एकादेशे	पश्यति इति सिद्धम्

२६०. ददृष्ठ / ददर्शिथ

	दृश् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	दृश् ल
तिप्तस्झिसिप्थस्थ...	लस्य सिबादेशे,	दृश् सिप्
परस्मैपदानां णलतुसुस्थलथुसणल...	सिप् स्थाने थलादेशे, अनु० लोपे	दृश् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	दृश् दृश् थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
उरत्	अत् आदेशे	
उरण् रपरः	रपरत्वे	दरश् दृश् थ
हलादिः शेषः	आदि हल शेषे	ददृश् थ
विभाषा सृजिदृशोः	विकल्पेन इडागमे, अनु० लोपे	ददृश् इथ
पुगन्तलघूपधस्य	उपधा गुणे	ददर्शिथ इति सिद्धम् (१)
	इडागमाभाव पक्षे	ददृश् थ
सृजिदृशोर्झल्यमकिति	अमागमे, अनु० लोपे	ददृ अश् थ
इको यणचि	ऋकार स्थाने यणादेशे	दद्र् अश् थ
व्रश्च	षकारादेशे	दद्र् अष् थ
ष्टुना ष्टुः	ष्टुत्वे	दद्र् अष् ठ
	संयुक्ते	ददृष्ठ इति रूपम् (२)

२६१. अदर्शत् / अद्राक्षीत्

	दृश् धातोः	
लुङ्	लुङ् लकारे, अनु० लोपे	दृश् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे, अनु० लोपे	दृश् ति
इतश्च	इकार लोपे	दृश् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अ दृश् त

च्लि लुङि	च्लिआगमे	अ दृश च्लि त्
इरितो वा	विकल्पेन च्लिस्थाने अङ् । अनुलोपे	अ दृश अ त्
ऋदृशोऽङि गुणः	ऋकारस्य गुणादेशे	
उरण् रपरः	रपरत्वे	अदर्शत इति सिद्धं
	अङ्अभावपक्षे	अ दृश च्लि त्
शल इगुपधादनिटः क्सः	क्स आदेशे प्राप्ते परं	
न दृशः	इत्यनेन निषेधे	अ दृश च्लि त
च्लेः सिच्	च्लिस्थाने सिजादेशे, अनुलोपे	अ दृश स् त
अस्तिसिचोऽपृक्ते	ईडागमे । अनु० लोपे	अ दृश स् ई त्
सृजिदृशोर्झल्यमकिति	अमागमे, अनु० लोपे	अ दृ अ श स् ई त
इको यणचि	यणादेशे	अ द्र श स् ई त
वदव्रजहलन्तस्याचः	वृद्धौ	अ द्राश स् ई त
व्रश्च	शस्य षत्वे	अ द्राष स् ई त
षढोः कः सि	षस्य कत्वे	अ द्राक स् ई त
आदेश प्रत्यययोः	सकारस्य षकारे	अ द्राक ष ई त
	संयोगे (क्+ष=क्ष)	(2) अद्राक्षीत इति

७०. डुपचष् धातोः
२६२. पेचिथ/पपक्थ

	पच् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	पच् ल
तिप्तस्झिसिप्थस्थ ..	लस्य सिबादेशे	पच् सिप्
परस्मैपदानां णलतुसुस्थलथुस	सिप् स्थाने थलादेशे, अनु० लोपे	पच् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	पच्पच् थ
ऋतो भारद्वाजस्य	~~[illegible]~~	
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
ऋतो भारद्वाजस्य	विकल्पेन इडागमे, अनु० लोपे	पच्पच् इथ
थलि च सेटि	अभ्यासलोपे अकारस्य एकारे	पेच् इथ
	संयुते	पेचिथ इति सि

	इङ् अभावपक्षे	पच पच अ
हलादिः शेषः	आदि हल शेषे	पपच् अ
चोःकुः	कत्वे	पपक् अ इति रूपं।

यज् धातोः

१. इयाज

६६३.

	यज धातोः	
परोक्षे लिट्	लिट् लकारे । अनु० लोपे	यज ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे । अनु० लोपे	यज तिप्
परस्मैपदानां णलतुसुस्थल...	तिप स्थाने णलादेशे । अनु० लोपे	यज अ
लिटिधातोरनभ्यासस्य	द्वित्वे	यज यज अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
लिट्यभ्यासस्योभयेषाम्	अभ्यासस्य संप्रसरणे	इअज यज अ
संप्रसारणाच्च	पूर्वरूपे	इज यज
हलादिः शेषः	जकार लोपे	इयज
अत उपधायाः	वृद्धौ	इयाज इति सिद्धं

ईजतुः

६६४.

	यज धातोः	
परोक्षे लिट्	लिट् लकारे । अनु० लोपे	यज ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	यज तस
परस्मैपदानां णलतुसुस्थलथुसणल...	तस स्थाने अतुसादेशे	यज अतुस
असंयोगाल्लिट् कित्	कित संज्ञायाम्	
वचिस्वपियजादीनां किति	संप्रसारणे	इअज अतुस
संप्रसारणाच्च	पूर्वरूपे	इज अतुस
लिटिधातोरनभ्यासस्य	द्वित्वे	इज इज अतुस
हलादिः शेषः	जकारलोपे	इइज अतुस
अकः सवर्णे दीर्घः	दीर्घे	ईजतुस
	ससजुषोरुः रुत्व विसर्गे	ईजतुः इति सिद्धं।

२६५. इयजिथ/इयष्ठ

	यज धातोः	
परोक्षे लिट्	लिट् लकारे	यज ल
तिप्तस्झिसिप्थस्थ	लस्य सिबादेशे	यज सिप्
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः	सिप् स्थाने थलादेशे। अनुबन्धलोपे	यज थ
लिटि धातोरनभ्यासस्य	द्वित्वे	यजयज थ
~~लिट्यभ्यासस्योभयेषाम्~~	~~संप्रसारणे~~	~~इअयजथ~~
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	यजथ
लिट्यभ्यासस्योभयेषाम्	संप्रसारणे	इअयजथ
संप्रसारणाच्च	पूर्वरूपे	इयजथ
ऋतो भारद्वाजस्य	विकल्पेन इडागमे। अनुबन्धलोपे	इयजिथ इति सिद्धम् (1)
	इट् अभावपक्षे	इयजथ
व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छ-शां षः	जकारस्य षकारे	इयष्थ
ष्टुना ष्टुः	ष्टुत्वे	इयष्ठ इति सिद्धम् (2)

२६६. यष्टा

	यज धातोः	
अनद्यतने लुट्	लुट् लकारे, अनुबन्धलोपे	यज ल
तिप्तस्झिसिप्	लस्य तिबादेशे/तकारादेशे	यज तिप्/त
स्यतासी लृलुटोः	तासागमे	यज तास ति/त
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप्/त स्थाने डा आदेशे। अनुबन्धलोपे	यज तास आ
टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	यज त आ
व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छ-शां षः	जकारस्य षत्वे	यष्ता
ष्टुना ष्टुः	ष्टुत्वे	यष्टा इति सिद्धम्

२६७. इज्यात् / यक्षीष्ट

	यज् धातोः	
आशिषि लिङ्लोटौ	आशी० लिङ् लकारे, अनुबन्धलोपे	यज ल

शेषात्कर्तरि परस्मैपदं	परस्मैपद संज्ञायाम्	
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे। अनु० लोपे	यजति
इतश्च	इकार लोपे	यजत्
यासुट् परस्मैपदेषूदात्तो ङिच्च	यासुडागमे, अनु० लोपे	यजयास्त्
सुट् तिथोः	सुडागमे, अनु० लोपे	यजयास्स्त्
स्कोः संयोगाद्योरन्ते च	उभयोः सकार लोपे	यजयात्
किदाशिषि	कित् संज्ञायाम्	
वचि-स्वपि-यजादीनां किति	संप्रसारणे	इअजयात्
संप्रसारणाच्च	पूर्वरूपे	(१) इजयात् इतिसिद्धं
स्वरितञितः कर्त्रभिप्राये क्रियाफले	आत्मनेपद संज्ञायाम्	यजल
तिप्तस्झिसिप्थस्थ...	लस्य तकारादेशे	यजत
लिङः सीयुट्	सीयुडागमे। अनु० लोपे	यजसीय् त
सुट् तिथोः	सुडागमे। अनु० लोपे	यजसीयस् त
लोपो व्योर्वलि	यकार लोपे	यजसीस्त
व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छ-शां षः	जकारस्य षत्वे	यष्सीस्त
षढोः कः सि	षकारस्य कत्वे	यक्सीस्त
आदेश-प्रत्यययोः	षत्वे	यक्षीष्त
ष्टुना ष्टुः	ष्टुत्वे	यक्षीष्ट
	संयोगे (क्+ष = क्ष)	यक्षीष्ट इतिसिद्धं।

प्र. वह् धातोः

१६८. उवहिथ / उवोढ

	वह् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु० लोपे	वह्ल
तिप्तस्झिसिब्...	लस्य सिबादेशे	वह्सिप्
परस्मैपदानां णलतुसुस्थलथुस...	सिप् स्थाने थलादेशे। अनु० लोपे	वह्थ
लिटि धातोरनभ्यासस्य	द्वित्वे	वह् वह्थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	ववह्थ

लिट्यभ्यासस्योभयेषाम्	संप्रसारणे	उअवहृ थ
संप्रसारणाच्च	पूर्वरूपे	उवहृ थ
ऋतो भारद्वाजस्य	विकल्पेन इडागमे अनुबन्धलोपे	उवहिथ इतिसिद्धम्
~~होढः~~	इड् अभाव पक्षे	उवहृ थ
होढः	ढत्वे	उवढ् थ
झषस्तथोर्धोऽधः	थकारस्य धकारे	उवढ् ध
ष्टुना ष्टुः	ष्टुत्वे	उवढ् ढ
ढो ढे लोपः	ढकारलोपे	उढ
ढ्रलोपे पूर्वस्य दीर्घोऽणः	दीर्घे प्राप्ते परं तत् प्रबाध्य	
सहिवहोरोद् अवर्णस्य	अकार ओकारे	ओढ इति रूप

वोढा

२६८

	वह् धातोः	
अनद्यतने लुट्	लुट् लकारे अनुबन्धलोपे	वह् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	वह् तिप्
स्यतासी लृलुटोः	तासागमे	वह् तास् तिप्
आर्धधातुकं शेषः	आर्धधातुकं संज्ञायाम्	
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे, अनुबन्धलोपे	वह् तास् आ
टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	वह् त आ
हो ढः	ढत्वे	वढ् ता
झषस्तथोर्धोऽधः	धत्वे	वढ् धा
ष्टुना ष्टुः	ष्टुत्वे	वढ् ढा
ढो ढे लोपः	ढकारलोपे	वढा
सहिवहोरोदवर्णस्य	अकारस्य ओकारे	वोढा इति

७३ वस धातोः

२७० ऊषतुः

	वस् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	वस् ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	वस् तस्

~~परस्मैपदानां णलतुसुस्थलथुसणल्वमाः | वस् स्थाने अतुसादेशे | वस् अतुस्~~
~~असंयोगाल्लिट्कित् | कित संज्ञायाम~~
~~लिटि धातोरनभ्यासस्य | द्वित्वे | वस्वस् अतुस्~~
~~पूर्वोऽभ्यासः | पूर्वस्य अभ्यास संज्ञायाम~~
~~हलादिः शेषः | आदि हल शेषे | वस् अतुस्~~
~~वचिस्वपियजादीनां किति | संप्रसारणे | उअस्अतुस् / उवस्वस्अतुस्~~
~~संप्रसारणाच्च | पूर्वरूप | उअस्अतुस् / उवस्अतुस्~~
~~सस्यरुत्वविसर्गे | उस्तुस / ऊस~~

परस्मैपदानां णलतुसुस्थल् ..	वस् स्थाने अतुसादेशे	वस्अतुस्
असंयोगाल्लिट्कित्	कित् संज्ञायाम	
वचिस्वपियजादीनां किति	संप्रसारणे	उअस् अतुस्
संप्रसारणाच्च	पूर्वरूपे	उस् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	उस् उस्अतुस्
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम	
हलादिः शेषः	आदि हल शेषे	उउस अतुस
अकः सवर्णे दीर्घः	सवर्ण दीर्घे	ऊसतुस्
	सस्य रुत्व विसर्गे	ऊसतुः
शासिवसिघसीनां च	सकारस्य षकारे	ऊषतुः इतिसिद्धं।

२०१. वत्स्यति

	वस् धातोः	
लृट् शेषे च	लृट् लकारे। अनु० लोपे	वस् ल
तिप्तस्झिसिप्थस्थ ..	लस्य तिबादेशे। अनु० लोपे	वस् ति
स्यतासी लृलुटोः	स्यागमे	वस् स्यति
सः स्यार्धधातुके	सकारस्य तकारे	वत्स्यति इतिसिद्धं

७४. वेञ् धातोः

२०२. वयति/वयते

	वेञ् धातोः	
वर्तमाने लट्	लट् लकारे। अनु० लोपे	वेञ् ल

तिप्तस्झिसिप्थस्थ...	लस्य तिप्/त आदेशे। अनुलोपे	वे ति/त
कर्तरि शप्	शबागमे। अनु० लोपे	वे अति/त
एचोऽयवायावः	अयादेशे	वयति/वयत
टित आत्मनेपदानां टेरे	आत्मनेपदे टे एत्वे	वयते इति रूपम्

293. उवाय

वेञ् धातोः

परोक्षे लिट्	लिट् लकारे। अनुलोपे	वे ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे	वे तिप्
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे। अनु० लोपे	वे अ
वेञो वयिः	विकल्पेन वेञ् स्थाने वयि आदेशे अनुलोपे	वय् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	वय्वय् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	वव्य् अ
लिट्यभ्यासस्योभयेषाम्	अभ्यासस्य संप्रसारणे	उअ वय् अ
संप्रसारणाच्च	पूर्वरूपे	उवय
अत उपधायाः	उपधा वृद्धौ	उवाय इति सिद्धम्

294. ऊयतुः

वेञ् धातोः

परोक्षे लिट्	लिट् लकारे। अनु० लोपे	वे ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	वे तस्
परस्मैपदानां णलतुसुस्थलथुसण...	तस् स्थाने अतुस् आदेशे	वे अतुस्
वेञो वयिः	विकल्पेन वेञ् स्थाने वयी। अनु० लोपे	वय् अतुस्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
ग्रहिज्या वयिव्यधिवष्टिविचतिवृश्चति पृच्छति भृज्जतीनां ङिति च	संप्रसारणे	उअय् अतुस्
सम्प्रसारणाच्च	पूर्वरूपे	उय् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	उय् उय् अतुस्
हलादिः शेषः	यकारलोपे	उ उय् अतुस्
अकः सवर्णे दीर्घः	दीर्घे	ऊय् अतुस्
	सस्य रुत्व विसर्गे	ऊयतुः इति सिद्धम्

वे-स्थाने वयि-इत्यभावपक्षे   वे अतुस्

३३. उवाय

	वेञ् धातोः	
परोक्षे लिट्	लिट्लकारे। अनु॰ लोपे	वे ल
तिप्तस्झिसिप्...	लस्य तिबादेशे	वे तिप्
परस्मैपदानां णलतुसुस्...	तिप् स्थाने णल् आदेशे। अनु॰ लोपे	वे अ
वेञो वयिः	विकल्पेन वय् आदेशे	वय् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	वय् वय् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	ववय
लिट्यभ्यासस्योभयेषाम्	अभ्यासस्य संप्रसारणे	उअवय
संप्रसारणाच्च	पूर्वरूपे	उवय
अत उपधायाः	उपधावृद्धौ	उवाय इति सिद्धं। (1)
	वे स्थाने वय्-इत्यभावपक्षे	वे अ
आदेच उपदेशेऽशिति	आत्वे	वा अ
वेञः	सम्प्रसारण निषेध	
लिटि धातोरनभ्यासस्य	द्वित्वे	वा वा अ
ह्रस्वः	ह्रस्वे	व वा अ
आत औ णलः	औकारादेशे	ववा औ
वृद्धिरेचि	वृद्धौ एकादेशे	ववौ इति रूपं (2)

३४. ऊयतुः

	वेञ् धातोः	
परोक्षे लिट्	लिट् लकारे। अनु॰ लोपे	वे ल
तिप्तस्झिसिप्...	लस्य तसादेशे	वे तस्
परस्मैपदानां णलतुसुस्थलथुस्...	तस् स्थाने अतुस् आदेशे	वे अतुस्
वेञो वयिः / असंयोगाल्लिट् कित्	विकल्पेन वेञ् स्थाने वय् / कित् संज्ञायाम्	वय् अतुस्
ग्रहिज्यावयिव्यधिवष्टिविचति...	संप्रसारणे	उअय् अतुस्
लिटि वयो यः	यकारस्य संप्रसारण निषेधे	
संप्रसारणाच्च	पूर्वरूपे	उय् अतुस्

लिटिधातोरनभ्यासस्य	द्वित्वे	उय् उय् अतुस्
हलादिः शेषः	यकारलोपे	उउय् अतुस्
अकः सवर्णे दीर्घः	दीर्घे	ऊयतुस्
वश्चास्यान्यतरस्यां किति	विकल्पेन यकारस्य वकारे	ऊवतुस्
	ससरुत्व विसर्गे	ऊवतुः इति सिद्धम् (1)
	पक्षे	ऊयतुः [illegible] (2)
	वेञ् स्थाने वय् इत्यभावपक्षे	वे अतुस्
आदेच उपदेशेऽशिति	आत्वे	वा अतुस्
~~लिटिधातोरनभ्यासस्य~~	~~द्वि~~	
ग्रहिज्यावयिव्यधिवष्टिविचति	सम्प्रसारण प्राप्ते परं	
वेञः	इत्यनेन सूत्रेण निषेधे	वा अतुस्
लिटिधातोरनभ्यासस्य	द्वित्वे	वावा अतुस्
ह्रस्वः	ह्रस्वे	ववा अतुस्
आतो लोप इटि च	आकार लोपे	वव् अतुस्
	संयुक्ते	ववतुस्
	ससरुत्व विसर्गे	ववतुः इति सिद्धम्।

७५. व्येञ् धातोः

२७५. ~~[illegible]~~ विव्याय

व्येञ् धातोः

परोक्षे लिट्	लिट् लकारे, अनु० लोपे	व्येल
तिप्तस्झि सिप्थस्थ ...	लस्य तिबादेशे,	व्ये तिप्
परस्मैपदानां णलतुसुस्थलथुस्	तिप् स्थाने णलादेशे अनु० लोपे	व्ये अ
आदेच उपदेशेऽशिति	आत्वे प्राप्ते परं	
न व्यो लिटि	इत्यनेन सूत्रेण निषेधे	व्ये अ
अचो ञ्णिति	वृद्धौ	व्यै अ
लिटिधातोरनभ्यासस्य	द्वित्वे	व्यैव्यै अ
लिट्यभ्यासस्योभयेषाम्	संप्रसारणे	वइ ए व्यै अ
संप्रसारणाच्च	पूर्वरूपे	वइ व्यै अ

एचोऽयवायावः	आयादेशे संयुते	वि व् य् आय् अ विव्याय इति सिद्धम्।

२७६. विव्यतुः

	व्येञ् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	व्ये ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	व्ये तस्
परस्मैपदानां णलतुसुस्थल	तस् स्थाने अतुसादेशे	व्ये अतुस्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
वचिस्वपियजादीनां किति	संप्रसारणे	व् इ ए अतुस्
संप्रसारणाच्च	पूर्वरूपे	व् इ अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	वि वि अतुस्
इको यणचि	यणि	वि व् य् अतुस्
	संयुते	विव्यतुस्
	सस्य रुत्व विसर्गे	विव्यतुः इति सिद्धम्।

हेञ् धातोः

२७७. जुहाव

	हेञ् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	हे ल
तिप्तस्झिसिप ...	लस्य तिबादेशे, अनु० लोपे	हे तिप्
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे, अनु० लोपे	हे अ
आदेच उपदेशेऽशिति	आत्वे	हा अ
लिटि धातोरनभ्यासस्य	द्वित्वे प्राप्ते तत् प्रबाध्य	
अभ्यस्तस्य च	संप्रसारणे	ह् उ आ अ
संप्रसारणाच्च	पूर्वरूपे	ह् उ अ
	संयुते	हु अ
लिटि धातोरनभ्यासस्य	द्वित्वे	हु हु अ
कुहोश्चुः	जकारादेशे	जु हु अ
अचो ञ्णिति	वृद्धौ	जु हौ अ

स्थोऽयवायावः	आवादेशे	जुहाव इति सिद्धं।

२७८. अह्वत

	ह्वेञ् धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	ह्वे ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे। अनु० लोपे	ह्वे ति
इतश्च	इकार लोपे	ह्वे त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अह्वे त
आदेच उपदेशेऽशिति	आत्वे	अह्वा त
च्लि लुङि	च्लि आगमे	अह्वाच्लि त
लिपिसिचिह्वश्च	च्लि स्थाने अङ् आदेशे, अनु० लोपे	अह्वाअ त
आतो लोप इटि च	आकार लोपे	अह्वअ त
	संयुक्ते	अह्वत इति सिद्धं

२७९. अह्वत / अह्वास्त

	ह्वेञ् धातोः	
लुङ्	लुङ् लकारे। अनु० लोपे	ह्वे ल
तिप्तस्झिसिप...	लस्य तकारादेशे	ह्वे त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे। अनु० लोपे	अह्वे त
आदेच उपदेशेऽशिति	आत्वे	अह्वा त
च्लि लुङि	च्लि आगमे	अह्वाच्लि त
आत्मनेपदेष्वन्यतरस्याम्	विकल्पेन च्लि स्थाने अङ्। अनु० लोपे	अह्वाअ त
आतो लोप इटि च	आकार लोपे	(1) अह्वत इति सिद्धं
	अङ् अभाव पक्षे	
च्लेः सिच्	सिजादेशे। अनु० लोपे	(2) अह्वास्त इति सिद्धं

अथ अदादिप्रकरणम्

अद् धातोः

२८०. अत्ति

	अद् धातोः	
वर्तमाने लट्	लट् लकारे। अनुबन्धलोपे	अद् ल

तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुलोपे	अद् ति
कर्तरि शप्	शबागमे, अनु॰लोपे	अद् अ ति
अदि-प्रभृतिभ्यः शपः	शप् लुकि	अद्ति
खरि च	दस्य चर्त्वेन तकारे	अतति
	संयोगे	अत्ति इति सिद्धं।

२२१. जघास

	अद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनुलोपे	अद् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे,	अद् तिप्
लिट्यन्यतरस्याम्	विकल्पेन घस्लृ आदेशे, अनु॰लोपे	घस् तिप्
परस्मैपदानां णलतुसुस्थल...	तिप् स्थाने णलादेशे, अनु॰लोपे	घस् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	घस् घस् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल शेषे	घघस् अ
कुहोश्चुः	घकारस्य झकारे	झघस
अभ्यासे चर्च	जश्त्वे	जघस
अत उपधायाः	वृद्धौ	जघास इति सिद्धं। (1)
	घस्लृ आदेश अभाव पक्षे	अद् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	अद् अद् अ
हलादि शेषः	दस्य लोपे	अ अद् अ
अत आदेः	अकारस्य दीर्घे	आ अद
अकः सवर्णे दीर्घः	दीर्घे	आद इति रूपं (2)

२२२. जक्षतुः

	अद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनुलोपे	अद् ल
लिट्यन्यतरस्याम्	विकल्पेन घस्लृ आदेशे, अनु॰लोपे	घस् ल
तिप्तस्झिसिप्थस्थ...	लस्य तसादेशे	घस् तस्
परस्मैपदानां णलतुसुस्थलथुस...	तस् स्थाने अतुसादेशे	घस् अतुस्

लिटि धातोरनभ्यासस्य	द्वित्वे	घस् घस् अतुस्
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदिहल शेषे	घघस् अतुस्
कुहोश्चुः	घकारस्य झकारे	झघस् अतुस्
अभ्यासे चर्च	जश्त्वे	जघस् अतुस्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
गमहनजनखनघसां लोपः क्ङित्यनङि	उपधा लोपे	जघ्स् अतुस्
शासिवसिघसीनां च	सकारस्य षकारे	जघ्ष् अतुस्
खरि च	घकारस्य ककारे	जक्ष् अतुस्
	संयोगे (क्+ष्=क्ष)	जक्षतुस्
	सस्य रुत्व विसर्गे	(1) जक्षतुः इति सिद्धः
	घसादेश अभावे	(2) आदतुः इति रूपं।

२६ः जघसिथ / आदिथ

	अद् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	अद् ल
तिप्तस्झिसिप्थस्थ...	लस्य सिबादेशे,	अद् सिप्
परस्मैपदानां णलतुसुस्थल...	सिप् स्थाने थलादेशे, अनु० लोपे	अद् थ
लिट्यन्यतरस्याम्	विकल्पेन घस्लृ आदेशे, अनु० लोपे	घस् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	घस् घस् थ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदिहल शेषे	घघस्थ
कुहोश्चुः	घकारस्य झकारे	झघस्थ
अभ्यासे चर्च	जश्त्वे	जघस्थ
कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि	इडागमे, अनु० लोपे	जघसिथ इति
	घस्लृ आदेश अभाव पक्षे	अदिथ
लिटि धातोरनभ्यासस्य	द्वित्वे	अद् अद् थ
हलादिः शेषः	दस्य लोपे	अ अद् थ
अत आदेः	अकारस्य दीर्घे	आ अद् थ

अकः सवर्णे दीर्घः	सवर्णदीर्घे	आदृथ
इट्यत्त्यव्ययतीनाम्	इडागमे	
अतो भारद्वाजस्य	विकल्पेन इट् प्राप्ते, परं	
इट्यत्त्यव्ययतीनाम्	इत्यनेन नित्यम् इडागमे, अनुबन्धलोपे	आदिथ इति रूपम्

१८४. अद्धि/अत्तात

	अद् धातोः	
लोट् च	लोट् लकारे, अनुबन्धलोपे	अद् ल
तिप्तस्झिसिप्...	लस्य सिबादेशे, अनुबन्धलोपे	अद् सि
कर्तरि शप्, अदिप्रभृतिभ्यः शपः	शबागमे, शप् लुकि	अद् अ सि, अद् सि
सेर्ह्यपिच्च	सिस्थाने हि आदेशे	अद् हि
तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्	हि स्थाने विकल्पेन तातङ् आदेशे, अनुबन्धलोपे	अद् तात
खरि च	दस्य चर्त्वेन तकारे	अत्तात इति सिद्धम्
	तातङ् अभाव पक्षे	अद् हि
हुझल्भ्यो हेर्धिः	हि स्थाने धि आदेशे	अद्धि इति रूपम्

१८५. आदत्

	अद् धातोः	
अनद्यतने लङ्	लङ् लकारे, अनु. लोपे	अद् ल
तिप्तस्झिसिप् --	लस्य तिबादेशे, अनु. लोपे	अद् ति
आडजादीनाम्	आडागमे, अनु. लोपे	आ अद् ति
आटश्च	वृद्धौ	आद् ति
इतश्च	इकार लोपे	आद् त्
कर्तरि शप्	शबागमे, अनु. लोपे	आद् अ त्
अदिप्रभृतिभ्यः शपः	शप् लुकि	आद् त्
अदः सर्वेषाम्	अडागमे, अनु. लोपे	आद् अ त्
	संयुक्ते	आदत् इति सिद्धम्

१८६. अघसत्

	अद् धातोः	
लुङ्	लुङ् लकारे, अनुबन्धलोपे	अद् ल
तिप्तस्झिसिप्तस्थ...	लस्य तिबादेशे, अनुबन्धलोपे	अद् ति

लुङ्सनोर्घस्लृ	अद्स्थाने घस्लृ आदेशे, अनुबन्धलोपे	घसति
इत्यः	इकार लोपे	घस् त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु०लोपे	अघस् त
च्लि लुङि	च्लि आगमे	अघस च्लि त
पुषादिद्युताद्यॢदितः परस्मैपदेषु	च्लिस्थाने अङादेशे, अनु०लोपे	अघस अ त
	संयुक्ते	अघसत इति सिद्धम्

२२६. हन् धातोः

२२७. हतः

	हन् धातोः	
वर्तमाने लट्	लट् लकारे अनु०लोपे	
तिप्तस्झिसिप्थस्थ ...	लस्य तस् आदेशे	हन् ल
सार्वधातुकमपित्	ङिद्वद्भावे	हन् तस्
अनुदात्तोपदेशवनतितनोत्यादीनाम् अनुनासिकलोपो झलि क्ङिति	नकार लोपे	
	सस्य रुत्व विसर्गौ	ह तस्
		हतः इति सिद्धम्

२२८. घ्नन्ति

	हन् धातोः	
वर्तमाने लट्	लट् लकारे, अनु०लोपे	हन् ल
तिप्तस्झिसिप्थस्थ ...	लस्य झि आदेशे	हन् झि
सार्वधातुकमपित्	ङिद्वद्भावे	
गमहनजनखनघसां लोपः क्ङित्यनङि	उपधा अकार लोपे	ह्न् झि
झोऽन्तः	झस्य अन्तादेशे	ह्न् अन्ति
हो हन्तेर्ञ्णिन्नेषु	कुत्वेन हस्य घः।	घ्न् अन्ति
	संयुक्ते	घ्नन्ति इति सिद्धम्

२२९. प्रहण्मि / प्रहन्मि

	प्र उपसर्गपूर्वक हन् धातोः	
वर्तमाने लट्	लट् लकारे	हन् ल
तिप्तस्झिसिप्थस्थ ...	लस्य मिबादेशे, अनु० लोपे	हन् मि
	प्र उपपदे	प्र हन् मि
कर्तरि शप्	शबागमे	प्रहन् अमि
अदिप्रभृतिभ्यः शपः	शप् लुकि	प्रहन् मि

प्रोर्वो	विकल्पेन नकारस्य णकारे अभावपक्षे	प्रहण्मि इति सिद्धं प्रहन्मि इति रूपं

जघान

	हन् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	हन् ल
तिप्तस्झिसिप्थस्थ ...	लस्य तिबादेशे, अनु० लोपे	हन् तिप्
परस्मैपदानां णलतुसुस्थलथुस	तिप् स्थाने णलादेशे, अनु० लोपे	हन् अ
लिटि धातोरनभ्यासस्य	द्वित्वे	हन् हन् अ
पूर्वोऽभ्यासः	पूर्वस्य अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	ह हन् अ
कुहोश्चुः	हकारस्य झकारे	झ हन् अ
अभ्यासे चर्च	~~झकारस्य~~ जकारे ८।४।५४	ज हन् अ
अत उपधायाः	वृद्धौ	ज हान
हो हन्तेर्ञ्णिन्नेषु	हकारस्य घकारे	जघान इति रूपसिद्धं

जघ्नतुः

	हन् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	हन् ल
तिप्तस्झसिप्	लस्य तसादेशे	हन् तस्
परस्मैपदानां णलतुसुस्थल..	तस् स्थाने अतुसादेशे	हन् अतुस्
लिटि धातोरनभ्यासस्य	द्वित्वे	हन् हन् अतुस्
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	ह हन् अतुस्
असंयोगाल्लिट् कित्	कित् संज्ञायाम्	
गमहनजनखनघसां लोपः क्ङित्यनङि	उपधा अकारस्य लोपे	ह ह्न् अतुस्
कुहोश्चुः	हकारस्य झकारे	झ ह्न् अतुस्
अभ्यासे चर्च	जश्त्वे	ज ह्न् अतुस्
हो हन्तेर्ञ्णिन्नेषु	कुत्वे	जघ्नतुस्
	सस्य रुत्व विसर्गौ	जघ्नतुः इति सिद्धं

२६१. जघनिथ

	हन् धातोः	
परोक्षे लिट्	लिट्लकारे, अनुबन्धलोपे	हन् ल
तिप्तस्झिसिप्...	लस्य सिबादेशे	हन् सिप्
परस्मैपदानां णलतुसुस्थल...	सिप् स्थाने थलादेशे, अनुबन्धलोपे	हन् थ
लिटि धातोरनभ्यासस्य	द्वित्वे	हन् हन् थ
पूर्वोऽभ्यासः	अभ्याससंज्ञायाम्	
हलादिः शेषः	आदि हल् शेषे	ह हन् थ
कुहोश्चुः	चुत्वे	झहन् थ
अभ्यासे चर्च	जश्त्वे	जहन् थ
अभ्यासाच्च	हकारे घकारे हस्य घत्वे	जघन् थ
ऋतो भारद्वाजस्य	विकल्पेन इडागमे, अनुबन्धलोपे	जघनिथ सिद्धि (1)
	इडभावपक्षे	जघन् थ
नश्चापदान्तस्य झलि	अनुस्वारे	जघंथ
अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे	जघन्थ सिद्धि (2)

२६२. हन्ता

	हन् धातोः	
अनद्यतने लुट्	लुट्लकारे, अनुबन्धलोपे	हन् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे	हन् तिप्
स्यतासी लृलुटोः	तासागमे	हन् तास् तिप्
लुटः प्रथमस्य डारौरसः	तिप् स्थाने डा आदेशे, अनुबन्धलोपे	हन् तास् आ
टेः	डित्वसामर्थ्याद् अभस्यापि टेर्लोपः	हन् त् आ
आर्धधातुकस्येड्वलादेः	इट् प्राप्ते, परं	
एकाच उपदेशेऽनुदात्तात्	इत्यनेन निषेधे	हन् ता
नश्चापदान्तस्य झलि	नकारस्य अनुस्वारे	हंता
अनुस्वारस्य ययि परसवर्णः	अनुस्वारस्य परसवर्णे	हन्ता इति सिद्धम्।

२६४. अवधीत्

	वध धातोः	
लुङ्	लुङ् लकारे, अनुबन्धलोपे	हन् ल

तिप्तस्झि सिप् - - -	लस्य तिबादेशो, अनुबन्धलोपे	हन्ति
लुङि च	वधादेशो	वध्यति
इतश्च	इकारलोपे	वध्त
अतो लोपः	अकारलोपे	वध्त
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनुबन्धलोपे	अवध्त
च्लि लुङि	च्लि आगमे	अवध्च्लित
च्लेः सिच्	च्लि स्थाने सिच्, अनुबन्धलोपे	अवध्स्त
आर्धधातुकस्येड्वलादेः	इडागमे, अनुबन्धलोपे	अवध्इस्त
अस्तिसिचोऽपृक्ते	ईडागमे, अनुबन्धलोपे	अवध्इस्ईत्
इट ईटि	सकारलोपे	अवध्इईत्
अकः सवर्णे दीर्घः	सवर्णदीर्घे	अवधीत्
नेटि	वृद्धि निषेधो	अवधीत् इति सिद्धम् ।

शीङ् धातोः

२६५. शेते

	शीङ् धातोः	
वर्तमाने लट्	लट् लकारे, अनुबन्धलोपे	शी लट्
तिप्तस्झि सिप् - - -	लस्य तकारादेशे	शी त
सार्वधातुके कर्तरि शप्	शबागमे, अनुबन्धलोपे	शी अ त
अदिप्रभृतिभ्यः शपः	शप् लुकि	शी त
सार्वधातुकार्धधातुकयोः	गुण प्राप्ते परं	
सार्वधातुकमपित्	ङिद्वद्भावे	
क्ङिति च	गुण निषेधे,	
	तत्प्रबाध्य	
शीङः सार्वधातुके गुणः	गुणे	शे त
टित आत्मनेपदानां टेरे	टेरेत्वे	शेते इति सिद्धम् ।

२६६. शेरते

	शीङ् धातोः	
वर्तमाने लट्	लट् लकारे, अनुबन्धलोपे	शी लट्

तिप्तस्झिसिप्...	लस्य झस्य आदेशे	
कर्तरि शप्	शबागमे, अनु० लोपे	शी झ
अदिप्रभृतिभ्यः शपः	शप् लुकि	शी अ झ
शीङः सार्वधातुके गुणः	गुणादेशे	शी झ
आत्मनेपदेष्वनतः	झस्य अत आदेशे	शे झ
टित आत्मनेपदानां टेरे	टेरेत्वे	शे अत
शीङो रुट्	रुडागमे, अनु लोपे	शे अते
	संयुक्ते	शे र् अते
		शेरते इति सिद्धम्

२२७. शिश्ये

	शीङ् धातोः	
परोक्षे लिट्	लिट् लकारे, अनु० लोपे	शी ल
तिप्तस्झि...	लस्य तकारादेशे	शी त
लिटस्तझयोरेशिरेच्	तकारस्य एशादेशे, अनु० लोपे	शी ए
लिटि धातोरनभ्यासस्य	द्वित्वे	शी शी ए
पूर्वोऽभ्यासः	अभ्यास संज्ञायाम्	
ह्रस्वः	ह्रस्वे	शि शी ए
इको यणचि	इक् स्थाने यणि	शि श्य् ए
	संयुक्ते	शिश्ये इति सिद्धम्।

८०. द्विष् धातोः

२२८.

	द्वेष्टि	
वर्तमाने लट्	लट् लकारे, अनु० लोपे	द्विष् ल
तिप्तस्झिसिप्...	लस्य तिप् आदेशे, अनु० लोपे	द्विष् ति
पुगन्तलघूपधस्य च [illegible]	उपधा गुणे	द्वेष् ति
ष्टुना ष्टुः	ष्टुत्वे	द्वेष्टि इति सि[illegible]

२२९. द्वेक्ष्यति / द्वेक्ष्यते

	द्विष् धातोः	
लृट् शेषे च	लृट् लकारे, अनु० लोपे	द्विष् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे, अनु० लोपे	द्विष् ति

स्यतासी लृलुटोः	स्य आगमे	द्विष् स्य ति
पुगन्तलघूपधस्य च	उपधा गुणे	द्वेष् स्य ति
षढोः कः सि	षकारस्य ककारे	द्वेक् स्य ति
आदेशप्रत्यययोः	षत्वे	द्वेक् ष् य ति
	क् ष् संयोगे क्ष	द्वेक्ष्यति इति रूपम्
	आत्मनेपद पक्षे	द्वेक्ष्यते इति रूपम्

500. द्वेष्टु / द्विष्टात्

	द्विष् धातोः	
लोट् च	लोट् लकारे। अनु० लोपे	द्विष् ल
तिप्तस्झिसिप्...	लस्य तिबादेशे। अनु० लोपे	द्विष् ति
कर्तरि शप्	शबागमे। अनु० लोपे	द्विष् अ ति
अदिप्रभृतिभ्यः शपः	शप् लुकि	द्विष् ति
एरुः	इकारस्य उकारे	द्विष् तु
~~पुगन्तलघूपधस्य च~~	~~उपधा गुणे~~	द्विष् तु
तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्	विकल्पेन तु स्थाने तातङ् आदेशे। अनु० लोपे	द्विष् तात्
पुगन्तलघूपधस्य च	गुण प्राप्ते परे	
क्ङिति च	इत्यनेन निषेधे	द्विष्तात्
ष्टुना ष्टुः	ष्टुत्वे	द्विष्टात् इति
	तातङ् अभाव पक्षे	द्विष्तु
पुगन्तलघूपधस्य च	गुणे	द्वेष्तु
ष्टुना ष्टुः	ष्टुत्वे	द्वेष्टु इति रूपम्

501. द्विड्ढि

	द्विष् धातोः	
लोट् च	लोट्लकारे। अनु० लोपे	द्विष् ल
तिप्तस्झिसिप् ...	लस्य सिबादेशे। अनु० लोपे	द्विष् सि
सेर्ह्यपिच्च	सिस्थाने हि आदेशे	द्विष् हि
हुझल्भ्यो हेर्धिः	हि स्थाने धि	द्विष् धि
झलां जश् झशि	जश्त्वे	द्विड् धि

ढ्रलोपे...	ढ्रलोपे	द्विड्ढि
पुगन्तलघूपधस्य च	गुण प्राप्ते पर	
सार्वधातुकमपित्	ङिद्वद्भावे	
क्ङिति च	गुण निषेधे	द्विड्ढि इति
अद्वेट्		

301.

द्विष् धातोः

अनद्यतने लङ्	लङ् लकारे, अनु० लोपे	द्विष् ल
तिप्तस्झिसिप्	लस्य तिबादेशे, अनु० लोपे	द्विष् ति
इतश्च	इकार लोपे	द्विष् त्
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अ द्विष् त्
कर्तरि शप्	शबागमे, अनु० लोपे	अ द्विष् अ त्
अदिप्रभृतिभ्यः शपः	शप् लुकि	अ द्विष् त्
पुगन्तलघूपधस्य च	गुणे	अद्वेष् त्
हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्	तकार लोपे	अद्वेष्
वावसाने	चर्त्वे	अद्वेट्
झलां जशोऽन्ते	जश्त्वे	अद्वेड् इति रूपम्
अद्विषुः		

302

द्विष् धातोः

अनद्यतने लङ्	लङ् लकारे, अनु० लोपे	द्विष् ल
तिप्तस्झिसिप्...	लस्य झि आदेशे	द्विष् झि
लुङ्लङ्लृङ्क्ष्वडुदात्तः	अडागमे, अनु० लोपे	अद्विष् झि
द्विषश्च	विकल्पेन झि स्थाने जुस्, अनु० लोपे	अद्विष् उस्
	संयुक्ते, सस्य रुत्व विसर्गे	अद्विषुः इति सिद्धम्
	अभाव पक्षे	अद्विष् झि
झोऽन्तः	झस्य अन्तादेशे	अद्विष् अन्ति
इतश्च	इकार लोपे	अद्विष् अन्त्
	संयुक्ते	अद्विषन्त्
संयोगान्तस्य लोपः	तकारस्य लोपे	अद्विषन् इति सिद्धम्

३०४. द्विषीत

	द्विष् धातोः	
विधिनिमन्त्रणामन्त्रणाऽधीष्ट	विधिलिङ्लकारे, अनुबन्धलोप	द्विष् ल
तिप्तस्झिसिप् ...	लस्य तकारादेश	द्विष् त
लिङः सीयुट्	सीयुडागमे, अनु० लोप	द्विष् सीय् त
सुट् तिथोः	सुडागमे, अनु० लोप	द्विष् सीय् स् त
लिङः सलोपोऽनन्त्यस्य	उभयोः सकार लोप	द्विष् ईय् त
लोपो व्योर्वलि	यकारलोप	द्विष् ई त
	ष्टुत्वे	द्विषीत इति सिद्धम्।

दुह् धातोः

३०५. दोग्धि

	दुह्धातोः	
वर्तमाने लट्	लट् लकारे, अनुबन्धलोप	दुह् ल
तिप्तस्झिसिप्थस्थ...	लस्य तिबादेशे, अनुबन्धलोप	दुह् ति
पुगन्तलघूपधस्य च	उपधा गुणे	दोह् ति
दादेर्धातोर्घः	हस्य घकारे	दोघ् ति
झषस्तथोर्धोऽधः	तकारस्य धकारे	दोघ् धि
झलां जश् झशि	घस्य ~~...~~ गः जश्त्वेन	दोग्धि इति सिद्धम्।

३०६. धोक्षि

	दुह्धातोः	
वर्तमाने लट्	लट् लकारे, अनु० लोप	दुह् ल
तिप्तस्झिसिप् ...	लस्य सिबादेशे, अनु० लोप	दुह् सि
पुगन्तलघूपधस्य च	उपधा गुणे	दोह् सि
दादेर्धातोर्घः	इति हस्य घः आदेशे	दोघ् सि
एकाचो बशो भष् झषन्तस्य स्ध्वोः	भष्भाव	धोघ् सि
खरि च	चर्त्वेन कः आदेशे	धोक् सि
आदेशप्रत्यययोः	षत्वे	~~धोक् षि~~ धोक्षि
	कषसंयोगे क्ष	~~धोक्षि इति सिद्धम्~~
		धोक्षि इति सिद्धम्।

२०७. धुग्ध्वे

	दुह् धातोः	
वर्तमाने लट्	लट् लकारे। अनुबन्धलोपे	दुह् ल
तिप्तस्झिसिप्...	लस्य ध्वमादेशे	दुह् ध्वम्
टित आत्मनेपदानां टेरे	टेरेत्वे	दुह् ध्वे
दादेर्धातोर्घः	हकारस्य घकारे	दुघ् ध्वे
झलां जश् झशि		
